[illegible]

श्रीः

अथ

# कविरहस्यम्

स्वविरचितप्रस्फोटसमेतम्

इदं

पुस्तकं

क्षीरसागरोपाह्वय एकनाथसूनुः

वामनशर्मा

पुण्यपत्तनेऽस्वामसाःमुद्रालये मुद्रयित्वा

प्रकाशमनैषीत्

शा० शकाब्देषु १८११ आश्विने शुक्ल १—दि

मूल्यं रूपकार्धम्

१८६७ ऐशवशाकीयं पञ्चविंशं नियममनुसृत्येदं

स्वायत्तीकृतं च.

देशपांडे कुलोत्पन्नस्य दैवाजी शर्मणः ।
वैशाख वद्य-द्वादश्याम् १८२६
शके क्रीतम् ।

श्रीः

अथ

भट्टहलायुधविरचितं

# कविरहस्यम्

स्वविरचित-प्रस्फोटसमेतम्

इदं

पुस्तकं

क्षीरसागरोपाह्वय एकनाथसूनुः

वामनशर्मा

पुण्यपत्तनेऽम्बाप्रसादमुद्रालये मुद्रयित्वा

प्रकाशमनैषीत्

शा० शकाब्देषु १८११ आश्विने शुक्ल १—दि·

मूल्यं रूपकार्धम्

१८६७ ऐशवशाकीयं पञ्चविंशं नियममनुसृत्येदं

स्वायत्तीकृतमाश्च.

## ॥ श्रीमान् ज्येष्ठराजो विजयते. ॥

### उपोद्धातः

( भट्टहलायुधनिबद्धं **कविरहस्यम**धिकृत्य. )

भुवि विजयन्ते किल प्रतिफलितसकलभुवनतलोदन्तजालविमलमनीषामयमहामणिमुकुराः सत्कविप्रवरा येषामसंकोचे वाचां प्रपञ्चे चिरं निमज्जदखिलं जगद् भूयो भूयःपरमानन्दमयाचिदम्भोधाविव चित्रीयति । तेषां च प्रथमपङ्क्तिनिवेशनीयः सुमहनीयमतिर्हलायुधः खलु विद्वद्वीरः श्रीमान् **भट्टहलायुधः** । येन खल्व**भिधानरत्नमाला**निबन्धनेन नानार्थनामशब्दानां **श्रीपैङ्गलच्छन्दो**विवृतिविरचनया च विविधच्छन्दसां प्रकाशनं विधाय गीर्वाणकाव्यवाणी विरचितमहोपकारभारेव विराजतेतरां भूरिविदां विदुषां समाजेषु ।

अयं हि **भट्टभास्कर**स्यान्तेवासी **भट्टहलायुधो** भुवि **शालिवाहन**शाकीये सप्तमसमाशतके बभूवेति **कविचरित्रा**दिनिबन्धपर्यालोचनयाऽवगम्यते । अनेनैव महाशयकविचक्रवर्तिना **कविरहस्य**नामा संचारिधातुसंकलनात्मकोऽनेकवृत्तविनिबद्धश्चारुनिबन्धो निरमायि । अस्य च पण्डितसंमतत्वं महापण्डितभट्टोजिदीक्षितैः स्वविरचित 'सिद्धान्तकौमुद्या' मेतदीयपद्यसमुद्धारादेव सुविश्रुतमिति नास्ति तद्विषये बहुलेखनायासव्यपेक्षा । अत्र हि **कृष्णराज**शर्माणमन्ध्रदेशीयं तदानींतनं नृपतिविशेषमधिकृत्य व्यभिचारिणां धातूनां तत्तदाकृतिप्रकाशकान् प्रयोगांस्तदीयगुणगणवर्णनव्याजेन यथायथं निबबन्ध निबन्धनिबन्धनपटुः प्रकृतकवीन्द्रचन्द्रः । अयं च निबन्धो धातुविशेषान् विविदिषूणां छात्राणां भूयस उपकाराय भविष्यतीति वयमेतं स्वविरचित**प्रस्फोट**समेतं प्रकाशयितुं प्रावर्तामहि ।

अत्र च स्थूलाक्षरविलिखितसंचारिधातुप्रयोगान् मूलश्लोकानुपरि संलिख्य तत्तत्प्रयोगेषु **प्रस्फोटा**ङ्कसंवादिनोऽङ्कान् संस्थाप्य रेषाया

अधस्ताल्लध्वक्षरैस्तत्तद्धातुविशेषस्वरूपप्रस्फोटनार्थकं **प्रस्फोट**मलिखाम । **प्रस्फोटे** च प्रथमं धातुप्रयोगस्थापितमङ्कमुपन्यस्य धातुं तदन्वनुबन्धमीदृश ( ) कुण्डलिकायां संलिख्यादेशादिकं चेदृश- [ ] कुण्डलिकया प्रदर्श्य ततोऽर्थं च धातुपाठपठितं प्रकाश्याग्रत आयतया कुण्डलिकया गणसूचकमङ्कं पदसूचकमाद्याक्षरं च विन्यस्य विशेषविधानादिज्ञापनं च कौमुदीगतपाणिनीयसूत्राङ्कनिर्देशपूर्वकं यथायथं सुव्यक्तं व्यरचि। तद्यथाः—१ गुप् (ऊ) रक्षणे (१—प.) गुपूधूपविच्छि (२३०३) इत्यायप्रत्ययः। एवमेव सर्वत्रोह्यम्।

अयं च यद्यप्याङ्कितपूर्वः कैश्चित्तथापि तत्र बहूनि स्खलितानि पाठप्रमादांश्च प्रस्फोटस्य दुर्बोधतामसाकल्यं चावलोक्यास्माभिरेतत्प्रकाशनोपक्रमाय निबद्धः परिकरः। अस्मिंश्चोपक्रमे पण्डितकुलोत्पन्न**विष्णुशास्त्रिविनिर्मितधातुकोशः** क्वचिदाङ्ग्लभौमकोशश्चास्माकं साहायकमकरोत्. वर्णक्रमापाठितधातुः पाणिनीयधातुपाठश्चास्माद्विरचितवर्णक्रमानुगुणकारिकाकलापः[१] प्रामाण्यविषये निःसंदेहतासंपादनेन बहूपकृतवान्।

किंचैतादृशबहुनिबन्धपर्यालोचनं लेखनं चैकस्य भूयांसमायासं कालातिपातं चावहेदिति विहितविज्ञप्तिसमभ्युपगमविधायिनोऽकृत्रिममित्ररत्नोपमाः खटावकरोपाहूयाः हरिशास्त्रिणश्चैतन्निर्माणे भूरि साहाय्यं व्यदधुरिति सप्रणयं विज्ञापयामः। इमं चोपक्रमं प्रवेशपरीक्षोन्मुखा अन्ये च धातुप्रभेदेषु बम्भ्रम्यमाणधियः संस्कृतानां वाचामध्येतारश्छात्राःपठनपर्यालोचनादिभिः सफलयन्त्वित्याशास्महे।

क्षीरसागरोपाह्व ऐकनाथिवामनः

**आ· मि· क·**

---

टीपः—१अयं च कारिकाकलापो 'धातुमणिमालेति विधृतललितनामधेयः पृथगङ्कितोऽस्माभिरिति विदाङ्कुर्वन्तु सन्तः।

श्रीः

# अथ कविरहस्यगतधातूनां वर्णानुक्रमः


| धातुः | प्रकाराः | श्लोकाङ्कः | धा. | प्र. | श्लो. |
|---|---|---|---|---|---|
| अङ्क् | ... द्वौ ... | १६० | ऊय् | ... ,, ... | २१५ |
| अञ्च् | ... त्रयः ... | १२ | ऊर्ज् | ... द्वौ ... | २१६ |
| अञ्ज् | ... एकः ... | २२९ | ऋ | ... ,, ... | ४५ |
| अण् | ... ,, ... | १७४ | ऋच्छ् | ... एकः ... | २१७ |
| अन् | ... ,, ... | ,, | ऋज् | ... ,, ... | १०० |
| अम् | ... द्वौ ... | १९२ | ऋण् | ... ,, ... | ४५ |
| अय् | ... एकः ... | २३-२६० | ॠण् | ... ,, ... | ४५ |
| अर्च् | ... त्रयः ... | ११६ | एज् | ... द्वौ ... | २७० |
| अर्ज् | ... द्वौ ... | १०० | एध् | ... एकः ... | ,, |
| अर्थ | ... ,, ... | २६५ | एष् | ... ,, ... | २४८ |
| अर्द् | ... त्रयः ... | ११८ | कठ् | ... त्रयः ... | ८९ |
| अर्ह् | ... द्वौ ... | २५३ | कथ | ... एकः ... | २२७ |
| अश् | ... ,, ... | २६७ | कत्थ् | ... ,, ... | ,, |
| आप् | ... त्रयः ... | ६६ | कल् | ... त्रयः ... | ७० |
| आशास् | ... एकः ... | २२ | कस् | ... एकः ... | २३३ |
| इ | ... चत्वारः | २३-२४८ | काङ्क्ष् | ... ,, ... | १६४ |
| इन्ध् | ... एकः ... | २७० | काश् | ... द्वौ ... | १५२ |
| इल् | ... द्वौ ... | १८ | कास् | ... एकः ... | २३३ |
| इष् | ... त्रयः ... | ३६ | कित् | ... ,, ... | २५८ |
| ई | ... एकः ... | २३ | किल् | ... ,, ... | २३४ |
| ईक्ष् | ... ,, ... | २२५ | कु | ... पंच ... | १७-२० |
| ईक्ष | ... ,, ... | ,, | कुच् | ... द्वौ ... | १४० |
| ईड् | ... द्वौ ... | १५९ | कुट् | ... एकः ... | २३५ |
| ईर् | ... त्रयः ... | १८ | कुण् | ... ,, ... | १७-२४१ |
| ईष् | ... एकः ... | ३६ | कुस् | ... द्वौ ... | २५० |
| उच्छ् | ... ,, ... | १६२ | कुथ् | ... त्रयः ... | १२४ |
| उञ्छ् | ... ,, ... | १६२ | कुप् | ... द्वौ ... | १५८ |

| धा. | प्र. | श्लो. |
|---|---|---|
| कुट | ... एकः ... | २३५ |
| कृ | ... द्वौ ... | ४४ |
| कृत | ... ,, ... | १२२ |
| कृप | ... द्वौ ... | ८३ |
| कृप | ... एकः ... | २३६ |
| कृष् | ... द्वौ ... | १८४ |
| कॄ | ... त्रयः४४,१३७–२४१ | |
| कॄत् | ... एकः ... | १२२ |
| केत | ... ,, ... | २५८ |
| क्रद् | ... ,, ... | ७२ |
| क्रन्द् | ... द्वौ ... | ,, |
| क्रप् | ... एकः ... | २३६ |
| क्रम् | ... द्वौ ... | १८९ |
| क्री | ... एकः ... | १३७ |
| क्रीड् | ... ,, ... | २३४ |
| क्लम् | ... द्वौ ... | २२८ |
| क्लिद् | ... एकः ... | १३० |
| क्लिन्द् | ... ,, ... | ,, |
| क्लिश् | ... द्वौ ... | ९३ |
| क्लश् | ... एकः ... | ,, |
| क्षम् | ... द्वौ ... | १६९ |
| क्षि | ... एकः ... | ११३ |
| क्षिण् | ... द्वौ ... | ११० |
| क्षिप् | ... ,, ... | १९५ |
| क्षिब् | ... एकः ... | ८५ |
| क्षी | ... द्वौ ... | ११,११३ |
| क्षीव् | .... एकः ... | ८५ |
| क्षीव् | ... ,, ... | ,, |
| क्षुभ् | ... त्रयः ... | ५६ |
| क्षै | ... एकः ... | ११३ |
| खण्ड् | ... द्वौ ... | २६४ |
| खिट् | ... एकः ... | १५५ |
| खिद् | ... त्रयः ... | ६८ |
| खेट् | ... एकः ... | १५५ |
| खेल् | ... द्वौ ... | ६४ |
| खेला | ... एकः ... | ,, |
| गद् | ... ,, ... | २६७ |
| गद | ... ,, ... | २६७ |
| गर्ज् | ... द्वौ ... | २२० |
| गर्व् | ... एकः ... | ७१ |
| गर्व | ... द्वौ ... | ,, |
| गर्ह् | ...चत्वारः३३,२५५,१०८ | |
| गवेष | ... एकः ... | २४८ |
| गल्भ् | ... एकः ... | १५३ |
| गाध् | ... ,, ... | २६९ |
| गाह् | ... ,, ... | ,, |
| गुध् | ... द्वौ ... | ,, |
| गुप् | ...चत्वारः... | ६ |
| गुर् | ... एकः ... | ५१ |
| गर | ... द्वौ ... | ,, |
| गॄ | ... एकः ... | २५९ |
| गृह् | ... ,, ... | २५५ |
| गॄ | ... ,, ... | २५९ |
| ग्रथ् | .. द्वौ ... | १२ |
| ग्रन्थ् | ... त्रयः ... | १२ |
| ग्रह् | ... द्वौ ... | ३३ |
| घट् | ... ,, ... | १६५,२०१ |
| घुट् | ... ,, ... | १४६ |
| घुष् | ... ,, ... | १४१ |
| घूर्ण् | ... ,, ... | २३२ |
| चर्च् | ... त्रयः ... | १३८ |
| चर् | ... द्वौ ... | १२५ |
| चित्र | ... ,, ... | १५७ |
| चित् | ... ,, ... | १२६ |
| चीव् | ... एकः ... | २२२ |
| चुट् | .. द्वौ ... | २३० |
| चुर् | ... एकः ... | ८८ |
| च्यु | ... ,, ... | २२२ |
| चूर्ण् | ... द्वौ ... | ८८ |
| छद् | ...चत्वारः... | १६ |

| धा. | प्र. | श्लो. | धा. | प्र. | श्लो. |
|---|---|---|---|---|---|
| छद | ... एकः ... | २४७ | त्रस् | ... त्रयः ... | १०६ |
| छिद् | ... एकः ... | ,, | त्रुट् | ... द्वौ ... | ३८ |
| जन् | ... ,, ... | १९० | त्रै | ... एकः... | ४० |
| ,, (जा) | ... ,, ... | २६१ | त्वर् | ... ,, ... | २५६ |
| जुड् | ... त्रयः ... | ११२ | दक्ष् | ... द्वौ ... | २६८ |
| जुष् | ... एकः ... | २५९ | दद् | ... एकः ... | १७७ |
| जूर् | ... एकः ... | ९ | दध् | ... ,, ... | १७६ |
| जृष् | ... ,, ... | २५९ | दय् | ... ,, ... | ८४ |
| जॄ | ... चत्वारः... | ९ | दश् | ... ,, ... | २०८ |
| जै | ... एकः ... | २६१ | दंश् | ... ,, ... | ,, |
| ज्या | ... ,, ... | ९ | दा | ... ,, ... | १७७ |
| डी | ... द्वौ ... | १४२ | ,, | ... द्वौ ... | २४ |
| तन् | ... त्रयः ... | ९२ | दिव् | ... ,, ... | ६० |
| तप् | ...चत्वारः ... | ३० | दी | ... एकः ... | ८४ |
| तम् | ... एकः ... | २४६ | दु | ... ,, ... | २५७ |
| तर्ज् | ... द्वौ ... | २५७ | दुल् | ... एकः ... | २१२ |
| तय् | ... एकः ... | ४० | दू | ... ,, ... | २५७ |
| ताय् | ... ,, ... | ४० | दृ | ... ,, ... | ७३ |
| तिज् | ... ,, ... | १७० | दृश् | ... द्वौ ... | २०० |
| तिल्ह् | ... ,, ... | ४७ | दॄ | ... ,, ... | ७३ |
| तिल् | ... द्वौ ... | ,, | दे | ... एकः ... | ८४ |
| तिप् | ... एकः ... | ९६ | देव् | ... ,, ... | ६० |
| तुट् | ... ,, .. | ३८ | दै | ... ,, ... | २४ |
| तुर् | ... ,, ... | २५६ | दो | ... ,, ... | ,, |
| तुल् | ... ,, ... | २०६ | दोला | ... ,, ... | २१२ |
| तुला | ... ,, ... | ,, | द्राख् | ... ,, ... | १०९ |
| तुष् | ... ,, ... | १५४ | द्राघ् | ... ,, ... | ,, |
| ,, | ... ,, ... | १४८ | द्राह् | ... ,, ... | ,, |
| तूड् | ... ,, ... | ३८ | द्रै | ... ,, ... | २५५ |
| तूष् | ... ,, ... | १५४ | धा | ... द्वौ ... | १३२,१७६ |
| ,, | ... ,, ... | १४८ | धाव् | ... ,, ... | १२८,१३९ |
| तृह् | ... एकः ... | ७४ | धु | ... षट् ... | ८ |
| तृप् | ... चत्वारः ... | १० | धूर् | ... एकः... | १३९ |
| त्रप् | ... एकः ... | १६६ | धृ | ...चत्वारः... | ३५ |
| ,, | ... द्वौ ... | ९६ | धृष् | ... त्रयः... | ८० |

| धा. | प्र. | श्लो | धा. | प्र. | श्लोः |
|---|---|---|---|---|---|
| धे | ... एकः ... | १३२ | पृ | ... त्रयः ... | ७, ३७ |
| ध्वन् | ... द्वौ ... | २५६ | पेल् | ... एकः ... | १८ |
| नट् | ... ,, ... | १८० | पै | ... ,, ... | २५२, २६१ |
| नम् | ... एकः ... | २५४ | प्रगल्भ | ... ,, ... | १५३ |
| नमस् | ... ,, ... | ,, | प्रथ् | ... द्वौ ... | १९१ |
| निक्ष् | ... ,, ... | २०२ | प्रथ | ... एकः ... | २३८ |
| निज् | ... ,, ... | १३१ | प्री | ... त्रयः ... | ७ |
| निञ्ज् | ... ,, ... | ,, | प्रुष् | ... द्वौ ... | २६५ |
| निट् | ... ,, ... | १५० | प्याय् | ... एकः ... | १३५ |
| निद्रा | ... ,, ... | २५ | प्यै | ... ,, ... | ,, |
| निवास् | ... ,, ... | १४ | बध् | ... त्रयः ... | ५४ |
| निस् | ... ,, ... | २०२ | बर्ह् | ... द्वौ ... | २५३ |
| नी | ... द्वौ ... | २७२ | बुध् | ... त्रयः ... | ५३ |
| नु | ... त्रयः ... | ४३ | बृह् | ... ,, ... | ९५ |
| नेद् | ... एकः ... | १५० | भञ्ज् | ... द्वौ ... | १३३, २२९ |
| पच् | ... द्वौ ... | १४७ | भर्त्स् | ... द्वौ ... | २५० |
| पत् | ... ,, ... | ४९ | भ्रम् | ... ,, ... | २६४ |
| पन | ... एकः ... | ,, | भ्रस्ज् | ... एकः ... | ९७ |
| पद् | ... ,, ... | २०९ | भाज | ... ,, ... | २६६ |
| पद | ... ,, ... | ,, | भी | ... ,, ... | १२१ |
| पन्थ् | ... ,, ... | २३८ | भुज् | ... द्वौ ... | २६० |
| पल् | ... ,, ... | २६० | भू | ... चत्वारः ... | ५० |
| पश् | ... ,, ... | २३१ | भूष् | ... द्वौ ... | २५१ |
| पा | ... द्वौ ... | ६५, २६१ | भृ | ... त्रयः ... | ९७, १२७ |
| पार | ... एकः ... | ३७ | भृज् | ... एकः ... | ९७ |
| पी | ... ,, ... | ६५ | भेष् | ... द्वौ ... | १२१ |
| पीन | ... ,, ... | २५२ | मण्ड् | ... ,, ... | २५१ |
| पीव् | ... ,, ... | ६२ | मथ् | ... एकः ... | ६१ |
| पुष् | ... चत्वारः ... | २१ | मन्थ् | ... द्वौ ... | २४४ |
| पू | ... द्वौ ... | १८१ | मद् | ... ,, ... | ,, |
| पूर् | ... ,, ... | १५१ | मन्द् | ... एकः ... | १७३ |
| पुत्र् | ... एकः ... | २१ | मन्द | ... ,, ... | ,, |
| पॄ | ... द्वौ ... | ७, ३७ | मन् | ... द्वौ ... | १५६ |
| पृच् | ... चत्वारः ... | २८ | मह् | ... ,, ... | ३४ |
| पृण् | ... एकः ... | ७ | | | |

| धा. | प्र. | श्लो. |
|---|---|---|
| मह | ... एकः ... | ,, |
| मही | ... ,, ... | ,, |
| मा | ... त्रयः ... | ७९ |
| मान् | ... चत्वारः ... | ३२ |
| मार्ग् | ... द्वौ ... | ९० |
| मार्ज् | ... एकः ... | ५५ |
| मि | ... ,, ... | ३९ |
| मिद् | ... द्वौ ... | १३६ |
| मिल् | ... एकः ... | १४५ |
| मी | ... द्वौ ... | १४३ |
| ,, | ... ,, ... | ३९ |
| मील् | ... एकः ... | १४५ |
| मीम् | ... द्वौ ... | १८३ |
| मुच् | ... ,, ... | ४८ |
| मुट् | ... त्रयः ... | १०४ |
| मुद् | ... द्वौ ... | २१८ |
| मुष् | ... ,, ... | ११५ |
| मूर्छ् | ... ,, ... | २३९ |
| मूष् | ... एकः ... | ११५ |
| मृग् | ... ,, ... | ९० |
| मूल् | ... द्वौ ... | २५२ |
| मृ | ... ,, ... | १०५ |
| मृज् | ... ,, ... | ५५ |
| मृड् | ... ,, ... | २७२ |
| मृण् | ... एकः ... | १०५ |
| मृद् | ... द्वौ ... | १४४ |
| मृष् | ... चत्वारः ... | १५ |
| मोक्ष् | ... एकः ... | ४८ |
| म्लेच्छ् | ... द्वौ ... | १९९ |
| मय् | ... एकः ... | ३९ |
| यक्ष् | ... ,, ... | २६८ |
| यक्ष | ... ,, ... | ,, |
| यत् | ... त्रयः ... | ७५ |
| यम् | ... एकः ... | २१७ |
| य | ... द्वौ ... | १९७ |
| युज् | ... चत्वारः ... | ४२ |
| रट् | ... द्वौ ... | ७८ |
| रठ् | ... एकः ... | ,, |
| रध् | ... ,, ... | ११४ |
| रञ्ज् | ... द्वौ ... | २६३ |
| रस् | ... एकः ... | २०४ |
| रस | ... ,, ... | ,, |
| रह् | ... ,, ... | २६३ |
| रह | ... ,, ... | ,, |
| राध् | ... द्वौ ... | ११४ |
| रिख् | ... त्रयः ... | ९८ |
| रुज् | ... द्वौ ... | १९८ |
| रुध् | ... ,, ... | २५४ |
| रुष् | ... ,, ... | ८६ |
| रोड् | ... एकः ... | २७१ |
| रौड् | ... ,, ... | ,, |
| लक्ष् | ... त्रयः ... | १०२ |
| लङ्घ् | ... ,, ... | ६७ |
| लज् | ... एकः ... | २०५ |
| लप् | ... द्वौ ... | १९६ |
| लभ् | ... एकः ... | २१० |
| लल् | ... द्वौ ... | १०३ |
| लष् | ... ,, ... | २२६ |
| लस् | ... ,, ... | १८७ |
| लस्ज् | ... एकः ... | २०५ |
| ला | ... ,, ... | १०३ |
| लाभ | ... ,, ... | २१० |
| लिङ्ग् | ... द्वौ ... | २४२ |
| ली | ... चत्वारः ... | १८८,२६२ |
| लुञ्च् | ... ,, ... | ४६ |
| लुट् | ... त्रयः ... | १०७ |
| लुभ् | ... द्वौ ... | २६६ |
| लुम्प् | ... ,, ... | १७५ |
| लोक् | ... ,, ... | २४९ |

| धा. | प्र. | श्लो. |
| --- | --- | --- |
| लेच् | ,, | ,, |
| वच् | त्रयः | ९४ |
| वञ्च् | द्वौ | १८२ |
| वद् | त्रयः | ९९ |
| वर्ध् | एकः | ८० |
| वर् | ,, | ११ |
| वस् | त्रयः | १४,१६३ |
| वह् | एकः | २१३ |
| वाञ्छ् | ,, | १६४ |
| वास | ,, | १४-१६३ |
| वाह् | ,, | २१३ |
| विच् | ,, | १३४ |
| विन्छ् | त्रयः | १२० |
| विज् | ,, | १३४,१४९ |
| विट् | षट् | २५, ५२ |
| विपाश | एकः | २३१ |
| विष् | द्वौ | १९३ |
| वी | एकः | १९० |
| वृ | त्रयः | ११ |
| वृज् | चत्वारः | २७ |
| वृण् | एकः | ११ |
| वृध् | द्वौ | ८० |
| वृ | ,, | ११ |
| वे | एकः | २१५ |
| व्यय् | ,, | ११७ |
| व्यय | ,, | ,, |
| व्ये | द्वौ | ११७,२१५ |
| व्री | ,, | ११ |
| शक् | ,, | ६३ |
| शङ्क् | एकः | ,, |
| शण् | ,, | ७६ |
| शप् | द्वौ | १७९ |
| शब्द् | एकः | १८६ |
| शब्द | ,, | ,, |
| शल् | द्वौ | १०१ |
| शस् | त्रयः | २२ |
| शान् | एकः | ७६ |
| शाल् | ,, | १०१ |
| शास् | ,, | २२ |
| शि | ,, | ७६ |
| शिष् | त्रयः | ९१ |
| शीक् | द्वौ | १८५ |
| शील् | एकः | २४६ |
| शील | ,, | ,, |
| शुच् | द्वौ | २०७ |
| शुचि | एकः | २१९ |
| शुच्य् | ,, | ,, |
| शुध् | ,, | २९ |
| शुन्ध् | त्रयः | ,, |
| शुभ् | द्वौ | ४१ |
| शुम्भ् | ,, | ,, |
| शूर् | एकः | २४५ |
| शूर | ,, | ,, |
| श्रण् | द्वौ | १७२ |
| श्रा | ,, | १९ |
| श्रिष् | त्रयः | १६१,१९४ |
| श्री | एकः | १९ |
| श्रै | ,, | ९ |
| श्लथ् | ,, | १७१ |
| श्लथ | ,, | ,, |
| श्लिष् | त्रयः | ६२ |
| श्वित् | एकः | २३७ |
| श्विन्द् | ,, | ,, |
| सद् | त्रयः | ७७ |
| सभाज | एकः | २६६ |
| सम् | ,, | २२४ |
| सह् | चत्वारः | ३१ |
| साध् | द्वौ | २४७ |
| साम | एकः | २२४ |
| सिध् | द्वौ | २७१ |

| धा. | प्र. | श्लो. |
|---|---|---|
| सु | … त्रयः … | २६ २४३ |
| सुख् | … द्वौ … | ५६ |
| सुख | … एकः … | ,, |
| सू | … त्रयः … | २६, २४३ |
| सूद् | … द्वौ … | २५८ |
| सृ (धाव्) | … एकः … | १२८ |
| सृज् | … द्वौ … | १६८ |
| स्कंभ् | … त्रयः … | ८१ |
| स्तन् | … एकः … | २०३ |
| स्तन | … ,, … | ,, |
| स्तम्भ् | … त्रयः … | ८२ |
| स्तम् | … एकः … | २४६ |
| स्तु | … ,, … | ४३ |
| स्तुभ् | … ,, … | १२९ |
| स्तुम्भ् | … ,, … | ,, |
| स्तृ | … ,, … | ७४ |
| स्तॄ | … ,, … | ,, |
| स्तंप् | … ,, … | १६६ |
| स्तोभ् | … ,, … | ४३ |
| स्त्यै | … ,, … | ४० |
| स्ना | … ,, … | २२१ |
| स्निह् | … द्वौ … | २४५ |
| स्नै | … एकः … | २२१ |
| स्फुट् | … चत्वारः … | १३ |
| स्फुण्ट् | … एकः … | ,, |
| स्रस् | … ,, … | १७८ |
| स्रंस् | … ,, … | ,, |
| स्वद् | … ,, … | ११९ |
| स्वर | … ,, … | २२३ |
| स्वाद् | … द्वौ … | ११९ |
| स्विद् | … ,, … | २१४ |
| स्वृ | … एकः … | २२३ |
| हर्य् | … ,, … | १६७ |
| हल् | … ,, … | ,, |
| हा | … द्वौ … | २६२ |
| हिड् | … ,, … | १११ |
| हिस् | … त्रयः … | ५७ |
| हेड् | … एकः … | १११ |
| ह्राद् | … ,, … | २४० |
| ह्री | … ,, … | ५८ |
| ह्रीच्छ् | … ,, … | ,, |
| ह्णी | … ,, … | ,, |
| हृष् | … द्वौ … | २११ |
| ह्लाद् | … एकः … | २४० |
| ज्ञप् | … द्वौ … | ६९ |
| ज्ञा | … एकः … | ,, |


इति धात्वनुक्रमः समाप्तः ।

# शुद्धिपत्रम्.

| शुद्धम् | पृष्ठम् | पङ्क्तिः | शुद्धम् | पृष्ठम् | पङ्क्तिः |
|---|---|---|---|---|---|
| वायु | २ | १० | त्यग्निर्लाः | १९ | १ |
| (२३९५) | ,, | १४ | शृगालं च न | ,, | ११ |
| आवरणे | ३ | २५ | (१०–आ.) | ,, | १५ |
| णिजभावो | ४ | १६ | लुट् | ,, | २२ |
| (२४२३) | ,, | २२ | रध् (अ) हिंसासंराद्धयोः | २० | २३ |
| (१०–उ.) | ,, | २७ | नैनेक्ति | २२ | १४ |
| मुचादीना | ७ | १९ | (१–आ.) | २८ | २३ |
| परद्रव्यं गृह्णाति | ८ | ८ | (२३२२) | २९ | २४ |
| जिज्ञासाया | ,, | १७ | क्षत्रियः | ३१ | ८ |
| (२९४) | १२ | १८ | अयमाकृत्या | ३२ | २५ |
| कश्चित्तस्य | १३ | ५ | यदुद्यानं | ३३ | १ |
| खेला (०) विलासे | ,, | २६ | प्रथयति पन्थय | ३५ | ५ |
| उपसर्गाच्च | १७ | २४ | शशलाञ्छने | ३५ | ७ |
| कर्मबीजानि | १८ | ४ | चित्तं रजाति | ३८ | ११ |
| लक्ष् (अ) | ,, | २६ | लुभत्यर्थे | ३९ | ५ |

संपूर्णम् ।

☞ त्रयोदशपद्ये "'चूताश्चैते' इत्यारभ्य 'हृदयं'" इत्यन्ते पाठान्तरमुपलभ्यते तद्यथा–

'वल्लीषु पुष्पच्छदाः स्फोटन्ते नवकुड्मलानि कुटजप्रायेषु वृक्षेषु च ॥ स्फोटन्ति द्विषतां शिरांसि सततं' इति ॥

अयं चैकः श्लोकः पुस्तकान्तरेऽधिक उपलब्धः ' ॥ वाति वायुश्च सुरतौ तावन्मात्रीतिभीलवत् । उद्वेपति यथा स्त्रीणां स्वेदार्द्रं सुरते वपुः ॥ १६ ॥'

किन्त्वश्लीलत्वादिदोषदूषितत्वात् पुस्तकविशेषेऽनुपलम्भाच्चास्माभिरुपेक्षित इति बोद्धव्यम् ।

॥ श्रीगणेशाय नमः ॥

अथ

# श्रीहलायुधपण्डितविरचितं-

## कविरहस्यम्

[ अनुष्टुप्. ]

जयन्ति मुरजित्पादनखदीधितिदीपिकाः ॥
मोहान्धकारविध्वंसान्मुक्तिमार्गप्रदर्शिकाः ॥ १ ॥

[ इन्द्रवज्रा. ]

लोकेषु शास्त्रेषु च ये प्रसिद्धाः काव्येषु ये सत्कविभिः प्रयुक्ताः ॥
ये चिन्ततां चित्तविनोदनाय शब्दानहं धातुभिरुद्धरामि ॥ २ ॥

[ अनुष्टुप्. ]

एकार्था एकशब्दाश्च नानार्थाश्चैकवाचकाः ॥
सदृशार्थाभिधानाश्च नानार्थाः सदृशाक्षराः ॥ ३ ॥
एकार्थास्तुल्यशब्दाश्च निबध्यन्तेऽत्र धातवः ॥
धातुपारायणाम्भोधिपारोत्तीर्णधिया मया ॥ ४ ॥

---

अथ

## प्रस्फोटः

[ अनुष्टुप्. ]

नत्वा नुत्वा हृदि स्मृत्वा गणेशं च गिरं गुरुम् ॥
मया कविरहस्यस्य प्रस्फोटः क्रियते स्फुटः ॥ १ ॥

(१)—मुरजित्—श्रीकृष्णः। दीधितयः कान्तयः ता एव दीपिकाः दीपा इत्यर्थः। (२) ढेकृ-धेकृ-होडृ-द्राडृ-धाडृप्रमुखाः शास्त्रे प्रसिद्धा अपि सत्कविभिः प्रायो न प्रयुक्ताः। (३) एकार्था एकशब्दा अपि केवलं गणभेदभिन्नाः यथाः—धूनोति-धुनोति-धुनाति-धुवति-धूनयत्यादयः। (४) गोपायति-गोपयति-गुप्यत्यादयः। (५) पॄ-पृण्-प्रीङ् पृ-प्रीत्रादयः। (६) वस्ति-वासयति-वस्यत्यादयः। (७) जॄष्—ॠ—जूरिप्रभृतयः। (८) भट्टहलायुधनाम्ना.

अस्त्यगस्त्यमुनिज्योत्स्नापवित्रे दक्षिणापथे ।
**कृष्णराज** इति ख्यातो राजा साम्राज्यदीक्षितः ॥ ६ ॥

[ वसन्ततिलका. ]

**गोपायति**[1] क्षितिमिमां चतुरब्धिसीमां पापाज्जुगुप्सत[2] उदारमतिःसदैव
वित्तं च **गोपयति**[3] यस्तु वनीपकेभ्यो धीरो न **गुप्यति**[4] महत्यपि कार्यजाते६
अग्निं **पृणाति**[5] **पृणति**[6] द्विजदेवताभ्यः **प्रीणाति**[7] बान्धवजनानतिथीन् **पृ-
णोति**[8] ॥ यः **प्रीयते**[9] प्रणयिषु **प्रयते**[10] च भृत्यान् यं **प्रीणयन्ति**[11] कवि-
सूक्तिरसायनानि ॥ ७ ॥

**धूनोति**[12] चम्पकवनानि **धुनोत्य**[13]शोकं चूतं **धुनाति**[14] **धुवति**[15] स्फुठितातिमुक्तम्
वायुर्विधूनयति[16] केसरपुष्परेणून् यत्कानने **धवति**[17] चन्दनमञ्जरीश्च ८

---

(१)—गुपू (ऊ) रक्षेण (गणः १ प.) गुपूधू प०—२३०३—कौ.—इत्याय-प्रत्यये लटस्तिपि कर्तरी—(२१६७) ति शप् (अ) सार्वधातुके (२१६८) ति गुणश्च । (२) गुप्—(अ) गोपने (१—आ.) गुप्तिजि—(२३९३) ति गुपेर्निन्दायां सनि—सन्यङोरिति (२२९५) द्वित्वे —कुहो —(२२४५) रिति चुत्वम् । (३) गुप्—(अ.) भाषार्थः (१०—उ०) चुरादिभ्यः (२५६३) इति णिचि (इ) गुणायादेशौ । (४) गुप्—(अ) व्याकु-लत्वे (४—प.) दिवादिभ्य (२५०५)इति श्यन् (य)। (५) पॄ(०) पालन-पूरणयोः (९—प.) क्र्यादिभ्य —२५५४— इति श्ना (ना) * ऋवर्णान्न-स्येति णत्वम् । प्वादीना (२५५८) मिति ह्रस्वः । (६) पृण् (अ) प्रीणने (६—प.) तुदादिभ्य (२५३४) इति शः (अ)। (७) प्री (ञ्) तर्पणे कान्तौ च (९—उ०) । (८) पृ (०) प्रीतौ (५—प.) स्वा-दिभ्य (२५२२) इति श्नुः (नु) गुणश्च । (९) प्री (ङ्) प्रीतौ—(४—आ.) । (१०) प्री (ञ्) तर्पणे.—(१०—उ.) * आधृषाद्वेति विभाषया णिजभावः । (११) — "* धूञ्प्रीञोरिति नुक् (न्) । (१२) धु (ञ्) कम्पने (५—उ०) दीर्घान्तोऽप्ययमित्युक्तत्वात् दीर्घः । (१३) " । (१४) धू (ञ्) कम्पने—(९–उ०) । (१५) धू—(०) विधूनने (६—प.) अचि श्नुधातु० (२७१) इत्युवङ् (उव्) । (१६) धू (ञ्) विधूनने (१०—उ०) प्रीणयन्तीतिवत् नुक् । (१७) धू (ञ्) " (१—उ.) ।

कायो न जीर्यति[1] जृणाति[2] न यस्य शक्तिर्नो जूर्यते[3] भुजबलं न जिनाति[4] तेजः ॥ यद्विद्विषां जरति[5] चेतसि भोगतृष्णा तेषां वपूंषि विपिनेषु न जारयन्ति[6] ॥ ९ ॥

[ शार्दूलविक्रीडितम् ]

यस्तृप्नोति[7] पितॄन् सुधापरिगतैर्हव्यैश्च कव्यैः सदा
स्वाहाशब्दपवित्रितेन हविषा योऽग्नित्रयं तर्पति[8] ॥
देवांस्तर्पयति[9] प्रियोपकरणैर्मन्त्रैर्नमस्कारिभिः
तृप्यन्त्यन्यनरेन्द्रदुर्लभतमैः सम्यक् प्रकामैश्च यः * ॥ १० ॥
यो व्रीणाति[11] जयश्रियं रणमुखे धर्मं वृणीतेऽध्वरे[12] ॥
तेजोभिर्जगदावृणोति[13] वृणति[14] ज्ञातींस्तथार्हैर्धनैः ॥
सत्कीर्तिं च वृणाति[15] यो वरयति[16] क्षेमं यशो व्रीयते[17] ॥
युद्धे वारयति[18] द्विषो हि वरते[19] नित्यं प्रजोपद्रवम् ॥ ११ ॥

---

(१) जॄ (ष्) वयोहानौ (४—प.) ऋत इद्धातो (२३९०) रिति इत्त्वे हलि चे (३५४) ति दीर्घः । (२) जॄ (०) " (९—प.) । (३) जूर् (ई) " (४—आ.) । (४) ज्या (०) " (९—प.) ग्रहिज्ये (२४१२) ति संप्रसारणम् " संप्रसारणाच्चे (३३०) ति पूर्वरूपम् । हल (२५५९) इति दीर्घे प्वादीनामिति ह्रस्वः । (५) जॄ (०) " (१०—प.) विभाषया णिजभावे रूपम् । (६) जॄ (०) " (१०—उ.), णिचि अच (२५४) इति वृद्धिः । (७) तृप् (अ.) तर्पणे (५—प.) । (८)—तृप् (अ) तृप्तौ (१—प.) । (९)—तृप् (अ) " (१०—उ.) । (१०) तृप् ( अ ) " (४—प.) । (११)—व्री (०) वरणे (९—प.) मतान्तरेणास्य प्वादिभिन्नत्वान्न ह्रस्वः । (१२)—वॄ (ङ्) संभक्तौ (९—आ.) ई हल्यघो (२४९७) रितीत्त्वम् । (१३) वृ (ञ्) आवरेण (५—उ०) । (१४) वृण् (अ) प्रीणने (६—प.) (१५) वॄ (०) वरणे (९—प.)। (१६) —वर् (अ) ईप्सायाम् , (१०—प.) । (१७)—व्री (ङ्) वरणे ' (४—आ.)। (१८) वृ (ञ्) आवरणे ' (१०—उ०) । (१९) वृ (ञ्) " (१०—उ.) विभाषया णिजभावः । * अयं तुदादावपि दृश्यते

गाथां ग्रन्थयति[1] प्रसन्नललितां श्लोकं च यो ग्रन्थति[2]
श्लाघ्यं ग्रांथयति[3] स्फुटार्थमधुरं गद्यं च हृद्यं सदा ॥
भावालंकृतिपेशलं ग्रथति[4] यः स्पष्टाक्षरं नाटकं
ग्रथ्नाति[5] प्रथितावदातचरितः स्तोत्रं विचित्रं च यः ॥ १२ ॥

यस्योद्यानवने स्फुटन्ति[6] सततं चूताश्च ते चम्पकाः
स्फोटन्ते[7]ऽथ विपक्षपक्षनृपतीन् यः स्फुटयत्या[8] हवे ॥
अन्तः स्फोटति[9] विद्विषां च हृदयं यस्याहितं कुर्वतां
यश्चास्फोटयति[10] स्फुटं दश दिशः कुर्वन् रवैः पूरिताः ॥ १३ ॥

वस्ते[11] नेत्रवरं निवासयति[12] यश्चित्रं च चीनांशुकं
यो वस्यत्यरिषु[13] प्रवासयति[14] यः क्रुद्धः कुलं विद्विषाम् ॥
शश्वद्वासयति[15] व्रजन् दश दिशः कस्तूरिकाविभ्रमै-
र्लक्ष्मीर्यस्य मुखाम्बुजे निवसति[16] प्रीत्या सरस्वत्यपि ॥ १४ ॥

[ मालिनी. ]

मृषयति[17] न नृपाणां मर्षते[18] चोद्धतानामनुचितमणुमात्रं विद्विषां मृष्यते[19] च

---

(१) ग्रन्थ् (अ) उद्बन्धने —(१०—उ.)। (२) ग्रन्थ्, (अ.) ,, (१०—प.) णिजभावो वैकल्पिकः। (३) ग्रथ् (अ) सन्दर्भे, (१०—प.) अयमाङ्गलकोशे दृश्यते.। (४) ग्रथ् (०) संदर्भे (१—प.) को०। (५) ग्रन्थ् (अ) सन्दर्भे (९—प.)। (६) स्फुट्. (अ) विकसने, (६—प.)। (७) स्फुट् (अ) ” (१—आ.)। (८) स्फुट् (इ) परिहासे, (१०—उ.)। (९) स्फुट् (इर्) विशरणे, (१—प.)। (१०) स्फुट् (अ) भेदने (१०–उ) (११) वस् (अ.) आच्छादने। (२—आ.) अदिप्रभृतिभ्य (२४२४) इति शपो लुक्। (१२) निवास् (०) आच्छादने (१०—उ.)। (१३) वस् (उ) स्तम्भे (४—प.)। (१४) वस् (अ) स्नेहच्छेदापहरणेषु (१०—उ.)। (१५) वास (०) उपसेवायाम् (१०–उ.) (१६) वस् (अ) निवासे (१—प.)। (१७) मृष् (अ) तितिक्षायाम् (४ प) अयं बोपदेवमतेन कथादिः कोशे। (१८) मृष (अ) तितिक्षायाम् (१०–उ.) वैभाषिको णिजभावः (१९) मृष् (अ) तितिक्षायाम् (४—उ.)

अपि गुरुमपराधं मर्षति[1] ब्राह्मणानां सितवसनभृतां यो मर्षयत्यागमज्ञः[2] १५
निशितशरसहस्रैश्छादयत्यन्तरिक्षं[3] छदति[4] समरभूमिं विद्विषां तुण्डमुण्डैः
छदयति[5] सुरलोकं यो गुणैर्यं च युद्धे सुरयुवतिविमुक्ताश्छादयन्ते[6] स्रजश्च

कुवति[7] करटवृन्दं चक्रवाकाः कवन्ते[8] ॥ १६ ॥
श्रुतिपुटपरिपेयं क्रौञ्चचक्रं कुनाति[9] ॥
कुणति[10] च जलरङ्कुर्मन्मथोन्मत्तकान्ता-
रतिरसरमणीयं यद्गृहोद्यानवाप्याम् ॥ १७ ॥

[ शार्दूलविक्रीडितम्. ]

ईर्ते[11] यत्कीर्तिरैन्द्रं पुरमनवरतं प्रेरयत्यन्तरात्मा[12] ।
यं धर्मे प्रेरति[13] श्रीर्विषयसुखरसास्वादनाय प्रकामम् ॥
यः प्रेलत्यात्मनोऽहः[14] क्रतुभिरतनुभिः प्रेलयत्यस्त्रजालैः[15]
सङ्ग्रामे शत्रुसेनां द्रविणवितरणैः पेलयत्यर्थिदौःस्थ्यम्[16] ॥ १८ ॥

[ मन्दाक्रान्ता. ]

श्राति[17] श्राद्धे हविरभिमतं श्रोत्रियाणां गृहेषु ।

---

(१) मृष् (उ) सेचने सहने च (१-प.)। (२) मृष् (अ) तितिक्षायाम् (१०-उ.)। (३) छद् (अ) अपवारणे (१०-उ.)। (४) छद् (इर्) ऊर्जने (१-प.)। (५) छद् (०) अपवारणे (१०-प.)। (६) छद् (अ) " (१०-उ.)। (७) कु (ङ्) शब्दे (६-आ.) 'चान्द्रादयस्तु मन्यन्ते सर्वस्मादुभयं पदमि' त्युक्तत्वात् अन्यत्रादृष्टस्यापि परस्मैपदस्य प्रयोगः कृत इति बोध्यम्। (८) कु. (ङ्) शब्दे (१-आ.)। (९) कु (ञ्) शब्दे (९-उ०)। (१०) कुण् (अ) शब्दोपकरणयोः (६-प.)। (११) ईर् (अ) गतौ कम्पने च (२-आ.)। (१२) ईर् (अ) क्षेपे (१०-उ.)। (१३) ईर् (अ) क्षेपे (१०-प.) विभाषया णिजभावः। (१४) इल् (अ) स्वमक्षेपणयोः (१०-प.) णिजभावोवा। (१५) इल् (अ) प्रेरणे (१०-उ०)। एङि पररूप (७८) मिति पररूपम्। (१६) पेल् (ऋ) गतौ (१-प.) प्रयोजकस्य रूपम्। (१७) श्रा (०) पाके (२-प.)।

श्रीणा[1]त्यन्यान् स्वरुचिसदृशान् क्षीरखण्डप्रकारान् ॥
अन्नं श्राय[2]त्यनुपमरसं शूल्यमुष्णं च मांसं ।
राष्ट्रे यस्य श्रप[3]यति जनः सुस्थितो हव्यकव्यम् ॥ १९ ॥

[ वसन्ततिलका ]

को[4]कूयते शिशुकमप्यतिगौरवेण यः सर्वलोकहृदयाब्जविकाशसूर्यः ॥
शोकान्न कौ[5]ति कु[6]वते न भयाच्च कश्चिद्यन्मण्डले जनपदः क[7]वते च सूक्तम् ॥२०॥

[ उपजातिः ]

तृष्णां न पु[8]ष्णाति यशांसि पु[9]ष्यति प्रचारणैर्विभ्रमनांसि पो[10]षति ॥
भृत्यांश्च यः पो[11]षयतीहितैर्धनैः प्रतिक्षणं पू[12]षति यस्य विक्रमः ॥ २१ ॥

[ अनुष्टुप् ]

शा[13]स्त्यरीन् धर्ममा[14]शास्ते कीर्तिमा[15]शंसते पराम् ॥
यः शं[16]सति सतां वृत्तं विश[17]सत्युत्पथस्थितान् ॥ २२ ॥
रात्रावु[18]दयते चन्द्रो दिवोदयति[19] भास्करः ॥
[20]उदेति यः सदोर्व्यां च नोदीयन्ते[21] च शात्रवः ॥ २३ ॥

---

(१) श्री (ञ्) पाके (९–उ०)। (२) श्रै (०) पाके (१–प.)। (३) श्रा (म्) " (१–प.) घटादित्वाण्णिच्, अर्तिह्री–(२५७०)ति पुकि मितां ह्रस्व (२५६८) इति ह्रस्वः। (४) कु (ङ्) शब्दे (१–आ.) यङ्लुन्तस्येदं रूपम्। न कवते (२६४१) रिति चुत्वाभावः। (५) कु (०) " (२–प.) उतो वृद्धिर्लुकी (२४४३) ति वृद्धिः। (६) कु (ङ्) " (६–आ.)। (७) कु (ङ्) " (१–आ.)। (८) पुष् (अ) पुष्टौ (९–प.) रषाभ्या (२३५) मिति णत्वम्। (९) पुष् (अ) " (४–प.)। (१०) " (१–प.)। (११) पुष् (अ) धारणे (१०–उ.)। (१२) पूष् (अ) वृद्धौ (१–प.)। (१३) शास् (उ) अनुशिष्टौ (२–प.)। (१४) आशास् (उ) इच्छायाम् (२–आ.)। (१५) शस् (इ) " (१–आ.) आङ्पूर्वक एवायम्। (१६) शस् (इ) " (१–प.)। (१७) शस् (उ) हिंसायाम्। (१–प.)। (१८) अय् (अ) गतौ (१–आ.)। (१९) इ (०) " (१–प.)। (२०) इ (ण्) " (२–प.)। (२१) ई (ङ्) " (४–आ.)। उदुपसर्गपूर्वका एते ज्ञेयाः

ददाति[1] द्रविणं भूरि दाति[2] दारिद्र्यमर्थिनाम् ॥
योऽवदायति[3] सत्कीर्तिं शिरोऽवद्यति[4] विद्विषाम् ॥ २४ ॥
वेत्ति[5] सर्वाणि शास्त्राणि गर्वो यस्य न विद्यते[6] ॥
विन्ते[7] धर्मं सदा सद्भिस्तेषु पूजां स विन्दति[8] ॥ २५ ॥
यस्य पृथ्वी प्रसूतेऽर्थं[9] धर्ममर्थः प्रसूयते[10] ॥
प्रसौति[11] विजयं धर्मः स च प्रसवति[12] श्रियम् ॥ २६ ॥
वृणक्ति[13] वृजिनैः सङ्गं वृङ्क्ते[14] च विकलैः सह ॥
वर्जयनार्जवोपेतैर्यो[15] वर्जयति[16] दुर्जनैः ॥ २७ ॥
संपृक्ते[17] नातिशस्त्रैर्यः संपृणक्ति[18] न पापिभिः ॥
संपर्चयति[19] न क्षुब्धैः संपर्चति[20] न वञ्चकैः ॥ २८ ॥
यो गां शुन्धति[21] सत्येन तपसा शुन्धते[22] तनुम् ॥

---

(१) दा (डु ञ्) दाने (३–उ.) जुहोत्यादिभ्य (२४८९) इति श्लुः, श्लौ (२४९०) इति द्वित्वम्। (२) दा (प्) लवने। (२–प.)। (३) दै (प्) शोधने, (१–प.)। (४) दो (०) अवखण्डने (४–प.) ओतः श्यनि (२५१०) इत्योकारलोपः। (५) विद् (अ) ज्ञाने (२–प.)। (६) विद् (अ) सत्तायाम् (४–आ.) (७) विद् (अ) विचारणे, (७–आ.) रुधादिभ्य (२५४३) इति श्नम्। (न) श्नसोरल्लोप (२४६९) इत्यकारलोपः। (८) विद् (ल) [विन्द] लाभे (६–उ.) शे मुचदीना (२५४२) मिति नुम्। (९) षू [सू] (ङ्) प्राणिगर्भविमोचने, (२–आ.) धात्वादेः षः स (२२६४) इति सत्वम्। (१०) षू (ङ्) [सू] प्राणिप्रसवे (४–आ.)। (११) षु (०) [सु] प्रसवैश्वर्ययोः (२–प.)। (१२) षु (०) [सु] (१–प.) (१३) वृज् (ई) वर्जने (७–प.) चोः कुः (३७८)। इति कुत्वम्। (१४) वृज् (इ) " (२–आ.)। (१५) वृज् (ई) " (१–प.)। (१६) " (१०–उ.)। (१७) पृच् (ई) संपर्चने (२–आ.)। (१८) " (७–प.)। (१९) पृच् (अ) संयमने, (१०–उ०)। (२०)" वैभाषिको णिजभावः। (२१) शुन्ध् (अ) शौचे (१–प.)। (२२) " अयं धातुपाठे परस्मैपदवानप्यत्रात्मनेपदी प्रयुक्तः। अन्यत्रापि दृश्यते.

धियं शुन्धयते[1] ध्यानाज्ज्ञानाच्छुध्यति[2] यन्मनः ॥ २९ ॥
तपसादित्यवद्[3] धाम्ना तप्यते[4] यः परन्तपः ॥
तपते[5] रिपुराष्ट्रं यस्तापयत्यहितान्[6] दृशा ॥ ३० ॥
साहयत्याहवक्षोभं[7] सहति[8] द्रविणव्ययम् ॥
अन्यायं सहते[9] नासौ सह्यति[10] क्षितिरक्षणे ॥ ३१ ॥
यश्च मीमांसते[11] धर्मं मानयत्यखिलान्[12] द्विजान् ॥
मानति[13] स्वजनं सर्वं शत्रौ मानयते[14] परम् ॥ ३२ ॥
गृह्णीते[15] न परद्रव्यं गृह्णीति[16] विदुषां गुणान् ॥
गर्हते[17] हृदयं स्त्रीणां रिपोर्गर्हयते[18] शिरः ॥ ३३ ॥
नित्यं महति[19] माहेयीं भक्त्या महयति[20] द्विजान् ॥
लोके महीयते[21] यस्य कीर्तिर्लक्ष्मीश्च मंहते[22] ॥ ३४ ॥

---

(१) शुन्ध् (अ) " (१०–उ.)। (२) शुध् (अ) (४–प.)। (३) तप् (अ) सन्तापे, (१–प.)। (४) तप् (अ) ऐश्वर्ये, (४–आ.)। (५) " (१–आ.)। (६) तप् (अ) दाहे, (१०–उ.)। (७) सह् (अ) मर्षणे (१०–उ.) (८) " (१–प.)। (९) " (१–आ.)। (१०) सह् (अ) तृप्तौ सामर्थ्ये च (४–प.)।(११) मान् (अ) जिज्ञासायाम्, (१–आ.) मान्बध (२३९४) इति सन् अभ्यासदीर्घश्च। सन्यत (२३१७) इति पूर्वं अकारस्येकारः ततो दीर्घ इति ज्ञेयम्। (१२) मान् (अ) पूजायाम्, (१०–उ.)। (१३) मान् (अ) " (१–प.) (१४) मान् (अ) स्तम्भे (१०–उ.)। (१५) ग्रह् (अ) उपादाने, (९–उ.)। (१६) " (१७) गर्ह् (अ) कुत्सायाम्, (१–आ.)। (१८) गर्ह् (अ) विनिन्दने, (१०–उ.)। (१९) मह् (अ) पूजायाम्, (१–प.)। (२०) मह (०) "(१०–उ.) (२१) मही (ङ्) " (११–कण्ड्वादिः–आ.) कण्ड्वादिभ्य (२६७८) इति यक्। (२२) मह् (इ) वृद्धौ। (१–आ.) इदितो नुम् (२२६२) मिति नुम्।

धरते[1] यो धुरं धर्म्यां धैर्यं धारयति[2] ध्रुवम् ॥
ध्रियते[3] यस्य धीः सम्यक् ध्रियति[4] श्रीश्च शाश्वती ॥ ३५ ॥
इच्छति[5] ब्राह्मणैः सङ्गमन्विष्यति[6] च संगतिम् ॥
इष्णाति[7] धर्मकार्येषु यः सदोन्नतिमीर्षते[8] ॥ ३६ ॥
धर्मे व्याप्रियते[9] नित्यं पिपर्ति[10] पृथिवीं च यः ॥
पारयत्यर्थिनामाशां[11] पारयत्यखिलं[12] व्रतम् ॥ ३७ ॥
त्रुट्यन्ति[13] सर्वसन्देहास्त्रुटन्ति[14] ग्रन्थयो हृदि ॥
यस्मादज्ञानजं दुःखं तुटत्येनश्च[15] तूडति[16] ॥ ३८ ॥
मिनोति[17] नाकुलान् युद्धे मीनाति[18] द्विषतां बलम् ॥
यो मायां मीयते[19] मान्ये धर्मेण मयते[20] धनम् ॥ ३९ ॥
तयते[21] क्षत्रवृत्तिं यस्तायते[22] च कुलव्रतम् ॥
त्रायते[23] वर्णधर्मं च यत्कीर्तिस्त्यायति[24] क्षितौ ॥ ४० ॥

---

(१) धृ (ञ्) धारणे (१–उ.)। (२) धृ (ञ्) " (१–उ.) स्वार्थे णिच्। (३) धृ (ङ्) अवस्थाने (६–आ.)। (४) धृ (ङ्) आत्मनेपदस्यानित्यत्वम्। (५) इष् (अ) [इछ्] इच्छायाम् (६–प.) इषुगमियमा (२४००) मिति छः। (६) इष् (अ) गतौ (४–प.) अयमुपसर्गवशाच्छोधनार्थः। (७) इष् (अ) आभीक्ष्ण्ये (९–प.)। (८) ईष् (अ) गतिहिंसादर्शनेषु (१–आ.)। (९) पृ (ङ्) व्यायामे (६–आ.)। (१०) पॄ (०) पालनपूरणयोः (३–प.) अर्तिपिपर्त्यो (२४९३) रित्यभ्यासस्येकारः। (११) पॄ (०) पूरणे (१०–उ.)। (१२) पार (०) कर्मसमाप्तौ (१०–उ.)। (१३) त्रुट् (अ) छेदने (६–प.)। वा भ्राश (२३२१) इति श्यन् वा (१४) त्रुट् (अ) "। (१५) तुट् (अ) कलहकर्मणि (६–प.)। (१६) तूड् (अ) तोडने (१–प.)। (१७) मि (डु–ञ्) प्रक्षेपणे (५–उ.)। (१८) मी (ञ्) हिंसायाम् (९–उ.)। (१९) मी (ङ्) हिंसायाम् (४–आ.)। (२०) मय् (अ) गतौ. (१–आ.)। (२१) तय् (अ) गतौ (१–आ.)। (२२) ताय् (ऋ) सन्तानपालनयोः (१–आ.)। (२३) त्रै (ङ्) पालने (१–आ.)। (२४) ष्ट्यै–(०) [स्त्यै] शब्दसंघातयोः (१–प.)।

शोभते[1] रूपसंपत्त्या शुभति[2] स्फीतया श्रिया ॥
यःशुम्भति[3] शुभैरङ्गैर्दृष्ट्याऽरींश्च निशुम्भति[4] ॥ ४१ ॥
नियुङ्क्ते[5] भूमिपालान् यो नियोजयति[6] रक्षकान् ॥
नियोजति[7] च सामन्तान् स्वयमात्मनि युज्यते[8] ॥ ४२ ॥
धर्मान् स्तोभयति[9] स्तौति[10] देवान् नौति[11] गुरून् द्विजान् ॥
नुवति[12] त्रिषु लोकेषु यद्गुणान् प्रणुते[13] जनः ॥ ४३ ॥
बाणावलिं किरत्याजौ[14] करोति[15] शरमण्डलम् ॥
कृणोति[16] करिणः शत्रोः कृणाति[17] तुरगान् नवान् ॥ ४४ ॥
यस्य कीर्तिरियर्ति[18] द्यामृणाति[19] फणिनां पुरम् ॥
ऋणोति[20] पृथिवीं कृत्स्नां दिङ्मुखानि तथार्च्छति[21] ॥ ४५ ॥
यो लुञ्चति[22] गिरा किंचित् क्वचित् कार्येण लुञ्चति[23] ॥
यो लुञ्चति[24] परद्रव्यं तच्छिरो लुञ्चयत्यसौ[25] ॥ ४६ ॥

---

(१) शुभ् (अ) दीप्तौ (१–आ.)। (२) शुभ् (अ) शोभार्थः (६–प.)। (३) शुम्भ् (अ) " (६–प.)। (४) शुम्भ् (अ) हिंसायाम् (१–प.)। (५) युज् (इर्) योगे (७–उ.) उपसर्गेण भिन्नार्थः एवमग्रेऽपि बोध्यम्। (६) युज् (अ) संयमने (१०–उ.)। (७) युज् (अ) " (१–प.)। (८) युज् (अ) समाधौ (४–आ.)। (९) स्तोभ् (अ) श्लाघायाम्। (१०–उ.)। (१०) ष्टु (ञ्) [स्तु] स्तुतौ (२–उ)। (११) णु (०) [नु] स्तुतौ (२–प.)। (१२) णू [नू] स्तुतौ (६–प.)। (१३) णु (०) " (२–आ) परस्मैपदमनित्यं बोध्यम्। (१४) कॄ (०) विक्षेपे (६–प.)। (१५) कृ (डु–ञ्) करणे (८–उ.) तनादिकृञ्भ्य (२४६६) इति उः। (१६) कृ (ञ्) हिंसायाम् (५–उ.)। (१७) कॄ (०) हिंसायाम् (९–प.) (१८) ऋ (०) गतौ (३–प.) अर्तिपिपर्त्योः (२४९३) रितीकारादेशः। अभ्यासस्येति (२२९०) इयङ्। (१९) ऋ (०) गतौ (९–प.) प्वादित्वात् ह्रस्वः। (२०) ऋण् (उ) गतौ (८–उ.) (२१) ऋ [ऋच्छ्] गतिप्रापणयोः (१–प.) पाघ्रेति ऋच्छादेशः। (२२) लुञ्च् (अ) अपनयने, (१–प.)। (२३) " (२४) लुञ्च् (अ) " (२५) (१–प.) प्रेरणार्थे णिजन्तस्य रूपम्।

(वसन्ततिलका.)

तेतिल्यते[1] शिशुजनो गृहिणां गृहेषु तिल्लन्ति[2] यौवनमदेन च तद्युवानः
तेलन्ति[3] वारललनाश्च सह प्रियेण यस्य प्रजाश्च भयशोकरसानभिज्ञाः
यःसत्करे करिणि मुञ्चति[4] कङ्कपत्रं यश्च प्रमोचयति[5] चञ्चलमश्वकाये ॥
संख्येऽवमोक्षयति[6] यश्च शरं मनुष्ये स्वां स्वां भुवं प्रतिगते विदितांस्त्रवेदः

(माल्यभारा.) ॥ ४८ ॥

निपतन्ति[7] रणेषु यस्य बाणाः शितशस्त्रैर्निहता गतासवश्च ॥
पतयन्ति[8] समन्ततो विपक्षाः सकलक्षोणितले विपत्यते[9] यः ॥ ४९ ॥
भवते[10] दुरितक्षयं यथोक्तैः क्रतुभिर्भावयते[11] च नाकलोकम् ॥
भवति[12] त्रिदशैश्च पूजितो यस्तृणवद्भावयति[13] द्विषश्च सर्वान् ॥ ५० ॥

(इन्द्रवंशा.)

भग्नेषु नोद्गूरयते[14]ऽस्त्रमाहवे मुक्तायुधे नोद्गुरते[15] स सर्ववित् ॥
आगूर्यते[16] श्रीरपि तस्य संमुखं स्फुरद्यशः श्वेतपटावगुण्ठिता ॥ ५१ ॥

(उपजातिः)

अज्ञानि मित्राणि रहोपगूढे राजन्यके वेदयते[17] स एकः ॥
सुखं सदा वेदयते[18] च सर्वं स्वार्थं प्रजा यत्र निवेदयन्ति[19] ॥ ५२ ॥

---

(१) तिल् (अ) गतौ (१-प.) धातोरेकाच (२६२९) इति यङ् (य) द्वित्वम् । (२) तिल्ल् (अ) गतौ (१-प.) । (३) तिल् (अ) " । (४) मुच् (ऌ) मोचने (६-उ.) शे मुचादीना (२५४२) मिति नुम् (न्) । (५) मुच् (अ) प्रमोचने मोदने च (१०-उ.) । (६) मोक्ष् (अ) मोक्षणे (१०-उ.) अयं धातुपाठेऽनुपलब्धोऽपि कोशे दृश्यते । (७) पत् (ऌ) गतौ (१-प.) । (८) पत (०) गतौ वाऽदन्तः (१०-उ.) । (९) पत् (अ) ऐश्वर्ये (४-आ.) । (१०) भू (०) प्राप्तौ (१०-आ.) णिजभावः । (११) भू (०) संभावनायाम् (१०-उ) । (१२) भू (०) सत्तायाम् (१-प.) । (१३) भू (०) संभावनायाम् । " (१४) गूर् (अ) उद्यमने (१०-उ.) । (१५) गुर् (ई) " (६-आ) । (१६) गूर् (ई) हिंसागत्योः (४-आ.) । (१७) विद् (अ) चेतनाख्याननिवासेषु, (१०-आ.) । (१८) " । (१९) विद् (अ) ज्ञाने (२-प.) णिजन्तस्य रूपम् ।

[अनुष्टुप्]

बोधते[1] धर्मविद्यां यः क्षत्रविद्यां च बोधति[2] ॥
नित्यमध्यात्मयुक्तात्मा ब्रह्मविद्यां च बुध्यते[3] ॥ ९३ ॥
बीभत्सते[4] परस्त्रीभ्यो यो बध्नाति[5] मतिं परे ॥
बाधयन्ति[6] न दुःखार्ताः केशान् यदरियोषितः ॥ ९४ ॥
मार्ष्टि[7] तीर्थोदकैर्नित्यं मार्जयालेपनैर्द्विजान्[8]
यो मार्जयति[9] साम्राज्यश्रियश्चापलवाच्यताम् ॥ ९५ ॥
न क्षुभ्यति[10] रिपुष्वेकः क्षोभते[11] नानुजीविषु ॥
मनागपि मनो यस्य न क्षुभ्नाति[12] महाहवे ॥ ९६ ॥
न हिनस्ति[13] वृथा जन्तुं तृणान्यपि न हिंसति[14] ॥
तमेव हिंसयत्येकं[15] यस्तदाज्ञां विलङ्घते ॥ ९७ ॥
जिह्रेति[16] नीचसंगत्या ह्रीच्छत्यनृत[17]भाषणात् ॥

---

(१) बुध् (इर्) बोधने (१–उ.)। (२) बुध् (अ) बोधने (१–प.)। (३) बुध् (अ) अवगमने (४–आ.)। (४) बध् (अ) बन्धने (१–आ). चित्तविकारे सानि द्वित्वम्। एकाचो बशो भष् (३२६) इति भत्वम्। खरि चे (१२१) ति धकारस्य तकारः। (५) बन्ध् (अ) बन्धने (९–प.) अनिदिता (४१५) मिति नलोपः। (६) बध् (अ) संयमने (१०–उ.)। (७) मृज् (ऊ) शुद्धौ (२–प.) मृजे (२४७३) रिति वृद्धिः। व्रश्चभ्रस्जे (२८९४) ति जस्य षत्वे ष्टुना ष्टु-रिति (११३) तकारस्य टः। (८) मृज् (ऊ) शौचालङ्कारयोः (१०–प.) णिजभावः। (९) मार्ज् (अ) शुद्धौ शब्दे च (१०–उ) (१०) क्षुभ् (अ) संचलने (४–प.)। (११) क्षुभ् (अ) " (१–आ.)। (१२) क्षुभ् (अ) " (९–प)। (१३) हिस् (इ) [हिंस्] हिंसायाम् (७–प.) 'श्नान्नलोपः' (२५४४) इति नलोपः। (१४) हिस् (इ) " (१–प.)। (१५) हिस् (इ) " (१०–उ.)। (१६)–ह्री (०) लज्जायाम्, (३–प.) कुहोश्चु (२२४५) रित्यभ्यास-चुत्वम्। (१७) ह्रीच्छ् (अ) " (१–प.)।

यो वार्ताश्रवणादेव स्वैरिणीनां हृणीयते[1] ॥ ५८ ॥
शब्दादयो यं विषयाः सुखयन्ति[2] निरापदम् ॥
सुखायते[3] श्रिया नित्यं विद्यया यश्च सुख्यति[4] ॥ ५९ ॥
देवते[5] कन्दुकैर्नित्यं क्रीडाद्यूतैश्च दीव्यति[6] ॥
परिदेवयते[7] कश्चित्तस्य राष्ट्रे न दुःखितः ॥ ६० ॥
मथ्नाति[8] वादिनः शास्त्रे रणे मन्थति[9] वैरिणः ॥
मनो मंथति[10] नारीणां रूपेणाप्रतिमेन यः ॥ ६१ ॥
यः श्लिष्यति[11] प्रियां प्रेम्णा श्लेषति[12] द्विषतां पुरम् ॥
दुःश्लेषाण्यपि कार्याणि धिया श्लेषयति[13] क्षणात् ॥ ६२ ॥
कुतोपि शङ्कते[14] नासौ सर्वेषां शक्यते[15] तु यः ॥
शक्नोत्य[16]शक्यमप्याजौ विजेतुं भुजविक्रमात् ॥ ६३ ॥
खेलन्ति[17] यन्नरा नित्यं खेलायन्ति[18] च योषितः ॥
खेलन्ते[19] च जरत्योपि यत्प्रजा निरुपद्रवाः ॥ ६४ ॥
पिबन्ति[20] मधु पीवन्ति[21] पीयन्ते[22] च प्रियाननम् ॥

---

१ हृणी (ङ्) रोषणे लज्जायां च, (११–आ.)। २ सुख् (अ) सुखक्रियायाम् (१०–उ.)। ३ सुख (०) „ (० आ.) नामधातुरयम् सुखादिभ्य (२१७४) इति क्यङ् वृद्धिः। ४ सुख् (अ) तत्क्रियायाम् (११–प.) सुखमनुभवतीत्यर्थः। ५ देव् (ऋ) देवने (१–आ.)। ६ दिव् (उ) क्रीडादिषु (४–प.)। ७ दिव् (उ) परिकूजने (१०–आ.)। ८ मन्थ (अ) विलोडने। (९–प.)। ९ मथ् (इ) [मन्थ्.] हिंसासंक्लेशनयोः (१–प.)। १० मथ् (ए) विलोडने (१–प.)। ११ श्लिष् (अ) आलिङ्गने (४–प.)। १२ श्लिष् (उ) दाहे (१–प.)। १३ श्लिष् (अ) श्लेषणे (१०–उ.) १४ शक् (इ) [शङ्क्] शङ्कायाम् (१–आ.)। १५ शक् (अ) मर्षणे (४–उ.)। १६ शक् (ऌ) शक्तौ (५–प.)। १७ खेल् (ऋ) चलने (१–प.)। १८ खेला (०) (११–प.)। १९ खेल् (ऋ) " चान्द्रमतेनात्मनेपदं ज्ञेयम्। २० पा (०) [पिब्] पाने (१–प.) पाघ्रेति (२३६०) पिबादेशः। २१ पीव् (अ) स्थौल्ये (१–प.)। २२ पी (ङ्) पाने (४–आ.)

यत्प्रसादादविज्ञातस्वपरोपद्रवाः प्रजाः ॥ ६५ ॥
यः प्रापयति[1] सर्वत्र सन्मानं सर्पराजवत् ॥
प्रापति[2] प्रत्यहं तेजः कीर्त्या व्याप्नोति[3] रोदसी ॥ ६६ ॥
न लङ्घते[4] गुरोराज्ञां न लङ्घयति[5] यः स्थितिम् ॥
अव्याधिरपि दीप्ताग्निर्यः कदापि न लङ्घति[6] ॥ ६७ ॥
खिद्यते[7] यो न भृत्येषु याचकेषु न खिन्दति[8] ॥
खिन्ते[9] तेष्वेव ये द्रव्यं दीयमानं न गृह्णते ॥ ६८ ॥
आज्ञापयति[10] भृत्यार्थे यज्ञे संज्ञपय[11]स्त्वजान् ॥
भूपाश्च भक्तिनम्राभिर्वाग्भिर्विज्ञपयन्ति[12] यम् ॥ ६९ ॥
निष्कलन्ते[13] मुखाद्यस्य नाश्लीलपरुषा गिरः ॥
यः श्रियं कलयन्[14]नैन्द्रीमुत्कालयति[15] यद्यशः ॥ ७० ॥
सर्वो गर्वति[16] विद्याभिर्धनैर्गर्वायते[17]ऽपरः ॥
सर्वविद्यश्च सम्राट् च न स गर्वयते[18] प्रभुः ॥ ७१ ॥
क्रदन्ते[19] कान्दिशीभूता दिगन्ते यस्य शत्रवः ॥
क्रन्दन्त्यश्रुभि[20]रैर्वाक्यैः क्रन्दयन्ति[21] रिपुस्त्रियः ॥ ७२ ॥

---

१ आप् (ल) लम्भने (१०–प.)। २ " उभयपदीत्येके। णिजभावे रूपम्। ३ आप् (ऌ) व्याप्तौ (५–प.)। ४ लघ् (इ) [लङ्घ्] गत्यर्थे (१–आ.)। ५. लघ् (इ) " भाषार्थः (१०–उ.)। ६. लघ् (इ) [लङ्घ्] शोषणे (१–प.)। ७ खिद् (अ) दैन्ये (४–आ.)। ८ खिद् (अ) परिघाते (६–प.)। ९ खिद् (अ) दैन्ये (७–आ.)। १० ज्ञा (०) नियोगे (१०–उ.) अर्तिह्री (२५७०) ति पुक्। ११ ज्ञप् (अ–म्) मारणादिषु (१०–उ.)। १२ " तोषणे ( " ) मित्वाद् ह्रस्वः। १३ कल् (अ) गतौ संख्याने च (१–आ.) १४ कल् " (१०–उ.)। १५ कल् (अ) क्षेपे (१०–उ.)। १६ गर्व (अ) दर्पे (१–प.)। १७ गर्व (०) माने (नाम धातुरय-म्–आ.) कर्तुःक्यङ् (२६६५) इत्याचारार्थे क्यङ् (य) प्रत्ययः। १८ गर्व (०) माने (१०–आ)। १९ क्रद् (अ) वैकल्ये (१–आ) २० क्रद् (इ) [क्रन्द्] आह्वाने रोदने च (१–प.)। २१ क्रन्द् (अ) शोकसातत्ये (१०–उ.)।

य: सदा द्रियते[1] धर्मे दृणाति[2] च रणे रिपून् ॥
दरन्ति[3] दिगधीशाश्च यस्य दिग्विजयोद्यमे ॥ ७३ ॥
तृणत्ति[4] शात्रवान्युद्धे तच्छिरोभिस्तृणोति[5] गाम् ॥
स्तृणाति[6] त्रिदशावासं यः कुन्देन्दुनिभैर्गुणैः ॥ ७४ ॥
यतते[7] धर्म एवासौ यातयत्यहितं[8] विशाम् ॥
निर्यातयति[9] वैरं च नरेन्द्रेषु क्रमागतम् ॥ ७५ ॥
शीशांसते[10] खड्गलतां निशिनो[11]त्यसिचन्द्रिकाम् ॥
शाणयत्या[12]शुगान् शाणे यत्सैन्यं समराङ्कुरम् ॥ ७६ ॥
न सीदति[13] क्वचित् कार्ये सर्वत्रा[14]सीदति श्रियम् ॥
आसादयति[15] सर्वासां विद्यानां पारमप्यसौ ॥ ७७ ॥
रटन्ति[16] हाटकं यस्मात् प्राप्य विप्राः परस्परम् ॥
रटयन्ति[17] च रङ्गाणि भूमिं च रठयन्ति[18] ते ॥ ७८ ॥
श्रुत्या धर्मं मिमीते[19] यः किंचित् स्मृत्यापि मीयते[20] ॥
न माति[21] मानिनो यस्य यशस्त्रिभुवनोदरे ॥ ७९ ॥
यस्य श्रीर्वर्धते[22] नित्यं योऽर्थैर्वर्धयति[23] द्विजान् ॥

---

१ दृ (ङ्) आदरे (६–आ.) । २ दॄ (०) विदारणे (९–प.) । ३ दॄ (०) भये (१–प.) । ४ तृद् (उ–इर्) हिंसानादरयोः (७–उ.) । ५ स्तृ (ञ्) आच्छादने (५–उ.) । ६ स्तॄ (ञ्) आच्छादने (९–उ.) । ७ यत् (ई) प्रयत्ने (१–आ.) । ८ यत् (अ) निकारोपस्कारयोः । (१०–उ.) ९ " । १० शान् (अ) तेजने (१–उ.) सन्नन्तस्येदं रूपं मीमांसत इतिवत् । ११ शि (ञ) निशाने (५–उ.) १२ शण् (अम्) दाने गतौ च (१–प.) णिच् । १३ षद् (ऌ) [सद्] विशरणगत्यवसादनेषु (१–प) पाघ्राध्मे (२३६०) ति सीदादेशः । १४ षद् (ऌ) गतौ (१०–प.) णिजभावे रूपम् । १५ " (१०–उ.) । १६ रट् (अ) परिभाषणे (१–प) । १७. " प्रयोजकार्थस्येदं रूपम् । १८ रठ् (अ) " १९ मा (ङ्) माने शब्दे च (३–आ.) भृञामिदि (२४९६) ति अभ्यासस्येकारः । २० मा (ङ्) माने (४–आ.) । २१ मा (०) माने (२–प.) । २२ वृध् (उ) वृद्धौ (१–आ.) । २३ वृध् (उ) " (१०–उ) ।

वर्धयन्[१]स्वरिवीराणां क्रुद्धो मूर्धानमाहवे ॥ ८० ॥
विष्कम्भते[२] प्रजारिष्टं विष्कभ्नाति[३] यमाद्भयम् ॥
विष्कभ्नोति[४] परोद्योगं तपःशौर्यबलेन यः ॥ ८१ ॥

धनेन स्तभ्नुते[५] सर्वः स्तभ्नोत्य[६]न्यश्च विद्यया ॥
विद्याधनसमृद्धोऽपि यो न स्तभ्नाति[७] सज्जनः ॥ ८२ ॥
अर्थिनामीप्सितप्राप्तौ कल्पते[८] कल्पवृक्षवत् ॥
न कल्पयति[९] मिथ्यार्थान् शिरः कृपयति[१०] द्विषाम् ॥ ८३ ॥
दीनेषु दयते[११] नित्यं योऽर्थिभ्यो दयते[१२] धनम् ॥
दीयन्ते[१३] प्रत्यहं यस्य दुरितानि तपोबलैः ॥ ८४ ॥
शोकेन क्षीवते[१४] सर्वः क्षीवते[१५] हर्षहर्षितः ॥
उभाभ्यामपि संस्पृष्टो यस्तु नातीव क्षीव्यति[१६] ॥ ८५ ॥
न रोषयति[१७] तस्मै स यो न तुल्यो न चाधिकः ॥
यस्मै कुप्यति तस्यासौ कुलमेवाभिरोषति[१८] ॥ ८६ ॥
न धृष्णोति[१९] गुरोरग्रे न धर्षति[२०] निजाः प्रजाः ॥
तमेव धर्षयत्येष[२१] यस्तासु प्रतिकूलति ॥ ८७ ॥

---

१ वर्ध् (अ) छेदने (१०—उ.) । २ स्कभ् (इ) [स्कम्भ्] प्रतिबन्धे (१ —आ.) वेः स्कभ्नातेर्नित्य (२५५६) मिति षत्वम् । ३ स्कम्भ् (उ) रोधनस्तम्भनयोः (९ – प.) । ४ स्कम्भ् (उ) " (५—प.) । ५ स्तम्भ्(उ) (५—प.) । बोपदेवमते-नात्मनेपदम् । ६ " । ७ (९—प.) । ८ कृप् (उ) सामर्थ्ये (१—आ.) कृपो रो ल (२३५०) इति रेफस्य लकारः ९ " (१०—उ.) न समर्थयतीति भावः । १० कृप (०) दौर्बल्ये (१०—उ.) ११ दय् (अ) दानगतिरक्षणहिंसाऽदानेषु (१—आ.) १२ " । १३ दी (ङ्) क्षये (४—आ.) । १४. क्षीब् (ऋ) मदे (१—आ.) । १५ क्षीव् (ऋ) " बवयोः सावर्ण्याद् धातुभेदः १६ क्षिव् (उ) निरसने (४—प.) । १७ रुष् (अ) रोषे (१०—उ.) । १८ रुष् (अ) हिंसायाम् (१—प.) । १९ धृष् (त्रि, आ) प्रागल्भ्ये (५—प.) । २० धृष् (अ) प्रसहने (१०—प.) णिजभावः । २१ " णिजन्तस्य रूपमिदम् ।

चूर्यते[1] चोरवृत्तीन् यश्चूर्णयत्यारिमण्डलम्[2] ॥
अवचूर्णयते[3] व्योम यत्सेनाप्रभवं रजः ॥ ८८ ॥
नोत्कण्ठते[4] परद्रव्यं नोत्कण्ठति[5] परस्त्रियम् ॥
यस्योत्कण्ठयति[6] स्वास्थ्यं धर्मे एव मनः सदा ॥ ८९ ॥
यो मार्गयति[7] सन्मार्गं मार्गति[8] क्षेममात्मनः ॥
यस्मिन् मृगयते[9] नित्यं यायजूको जनो धनम् ॥ ९० ॥
विशिनष्टि[10] स्मरं मूर्त्या श्रिया शेषं विशेषति[11] ॥
विशेषयति[12] यो वाग्मी वाचा वाचस्पतेर्वचः ॥ ९१ ॥
वितानयति[13] यः कीर्तिं वितनसमलं[14] यशः ॥
वितनोति[15] रिपुस्त्रीणां हृदये मदनव्यथाम् ॥ ९२ ॥
क्लेशते[16] न वृथा वाक्यं क्लिश्यते[17] न च निष्फलम् ॥
नेन्द्रियाणि विरुद्धेषु क्लिश्नाति[18] विषयेषु यः ॥ ९३ ॥
हितं मितं च यो वक्ति[19] न वचयत्यप्रियं[20] वचः ॥
नानादेशसमुत्पन्नां वाचयत्यखिलां[21] लिपिम् ॥ ९४ ॥
यस्य बर्हति[22] नित्यं श्रीर्दानशक्तिश्च बृंहति[23] ॥
बृहन्ति[24] सिंहवद्यस्य द्विपा दुष्टारिवारणात् ॥ ९५ ॥

---

१ चूर् (ई) दाहे (४—आ.) । २ (चूर्ण) (अ) प्रेरणे संकोचे च (१०—उ.) । ३ " ४ कठ् (इ) [कण्ठ्] शोके आध्याने च (१—आ.) । ५ कठ् (इ) [कण्ठ्] " (१०—उ.) णिजभावे रूपम् । ६ " णिचि रूपम् । उत्पूर्वोऽयमुत्कण्ठायामिति कौमुदीकारः । ७ मार्ग् (अ) अन्वेषणे (१०—उ.) । ८ " (१०—प.) णिजभावे रूपम् । ९ मृग (०) अन्वेषणे (१०—आ.) १० शिष् (ऌ) विशेषणे (७—प.) । ११ शिष् (अ) असर्वोपयोगे (१०—प.) णिजभावः । १२ " णिजन्तम् । १३ तन् (उ) श्रद्धोपकरणयोः उपसर्गाच्च दैर्घ्ये (१०—उ.) । १४ " (१०—प.) णिजभावः । १५ तन् (उ) विस्तारे (८—उ.) । १६ क्लेश् (अ) अव्यक्तायां वाचि (१—आ.) । १७ क्लिश् (अ) अनुतापे (४—आ.) । १८ क्लिश् (ऊ) विबाधने (९—प.) । १९ वच् (अ) परिभाषणे (२—प.) कुत्वम् । २० " (१०—प.) णिजभावः । २१ " (१०—उ.) णिच् । २२ बृह् (अ) वृद्धौ (१—प.) । २३ बृह् (इ) [बृंह] वृद्धौ शब्दे च (१—प.) । २४ बृह् (ऊ) उद्यमने (६—प.)

तिपन्ति[1] यस्य मातङ्गास्तेपन्ते[2] च तुरङ्गमाः ॥
तेपयन्ति[3] मनुष्याश्च युद्धे निम्नोन्नतां भुवम् ॥ ९६ ॥
तपसा भर्जते[4] पापं तेजसाऽरींश्च भृज्जति[5] ॥
कर्मव्रजानि सर्वाणि योगाभ्यासाद्भृणोति[6] यः ॥ ९७ ॥
रिङ्क्ते[7] रिपुर्यदाक्रान्तो धनैस्तन्त्रैश्च रेचति[8] ॥
रेचयन्ति[9] च तन्नारीलोचनान्यश्रुवारिभिः ॥ ९८ ॥
सत्यं वदति[10] सर्वत्र सर्वस्य वदते[11] हितम् ॥
यन्न सत्यं न च हितं न वादयति[12] तद्वचः ॥ ९९ ॥
सर्वोऽप्यर्जयति[13] द्रव्यमात्मनः प्रीतिहेतवे ॥
अर्जते[14] शाश्वतीं कीर्तिं यश्चार्जति[15] जयं स्थिरम् ॥ १०० ॥
यस्य सङ्ग्रामशौण्डत्वं शालन्ते[16] बाहुशालिनः ॥
शलन्ति[17] यद्गुणा दिक्षु शलन्ते[18] च सुरालयम् ॥ १०१ ॥
लक्षयन्त्यस्थि[19] लक्षन्ते[20] मांसं लक्षन्ति[21] शोणितम् ॥
यत्खड्गखण्डिताङ्गानां शत्रूणां कोणपा रणे ॥ २ ॥

---

१ तिप् (ऋ) क्षरणे (१—आ.) अत्र चान्द्रादिमतेन परस्मैपदम् । संज्ञापूर्वकविधेरनित्यत्वोक्तेर्गुणाभाव इति बोध्यम् । २ तेप् ,, ३ स एव णिजन्तः । ४ भृजू (ई) भर्जने (१—आ.) । ५ भ्रस्ज् (अ) पाके (६—प.) संप्रसारणे सस्य श्चुत्वे, झलां जश् (५२) इति जश्त्वेन जकारः । ६ भृ (०) । ७ रिच् (इर्) विरेचने (७—उ.) । ८ रिच् (अ) वियोजनसंपर्चनयोः (१०—प.) । णिजभावः । ९ ” णिचो रूपम् । १० वद् (अ) व्यक्तायां वाचि (१—प.) । ११ वद् (अ) सन्देशवचने (१०—उ.) णिजभावः । १२ ” णिचो रूपम् । १३ अर्ज् (अ) प्रतियत्ने सम्पादने च (१०—उ.) १४ ऋज् (अ) गतिस्थानार्जनोपार्जनेषु (१—आ.) । १५ अर्ज् (अ) अर्जने (१—प.) १६ शाल् (ऋ) कत्थने (१—आ) । १७ शल् (अ) आशुगमने (१—प.) । १८ शल् (अ) चलनसंवरणयोः (१—आ.) । १९ लक्ष् (आ) दर्शनाङ्कनयोः (१०—उ)। २० ” । २१ ” सामान्यणिज्विकल्पपक्षेण णिजभावो ज्ञेयः ।

यश्च लालयते[1] बन्धून् लालयत्यखिलाः[2] प्रजाः ॥
उल्ललन्ति[3] यमालोक्य ललनानां मनोरथाः ॥ ३ ॥
मुटति[4] द्विषतां शौर्यं[5] तेषां दर्पंच मोटति[5] ॥
यो मोटयति[6] राष्ट्रेषु तत्कृतारामसमण्डपान् ॥ ४ ॥
मृधे मृणाति[7] शत्रूणामश्वान् मृणति[8] वारणान् ॥
शत्रुबाणैः पुरस्तस्य नैकोऽपि म्रियते[9] परः ॥ ५ ॥
त्रस्यन्ति[10] रिपवो यस्मात् त्रसन्ति[11] परदारगाः ॥
यस्त्रासयति[12] निःशेषान् भूयोऽनन्तरभूपतीन् ॥ ६ ॥
लुट्यत्यट्टालिकं[13] दुर्गं कपाटानि च लोटते[14] ॥
रिपूणां लोटयेत्साजौ[15] कुञ्जराणां घटाश्च यः ॥ ७ ॥
न तथा गर्हते[16] श्वानं शृगालंच गर्हति[17] ॥
गर्हयत्येकमेवार्थन्यासिनं[18] स नरं यथा ॥ ८ ॥
द्राघते[19] वपुरत्यर्थं द्राहते[20] च निशागमे ॥
द्राखति[21] तृणतापन्नं यद्वियोगे मृगीदृशाम् ॥ ९ ॥

---

१ लल् (अ) ईप्सायाम् (२०–आ.) । २ ला (०) आदाने दाने च (२—प.) णिजन्तस्येदं रूपम् स्नेहविपालनेऽर्थे लीलोर्नुक्लुका (२५९१) विति लुक्। (ल्)। ३ लल् (अ) विलासे (१—प.) । ४ मुट् (अ) आक्षेपमर्दनबन्धनेषु (६—प.) । ५ मुट् (अ) मर्दने (१—प.) । ६ मुट् (अ) संचूर्णने (१०—उ.) । ७ मृ (०) हिंसायाम् (९—प.) । ८ मृण् (अ) मारणे (६—प.) । ९ मृ (ङ्) प्राणत्यागे (४–आ)। १० त्रस् (ई) उद्वेगे (४–प.)। ११ त्रस् (ई) " (१–प.)। १२ त्रस् (अ) धारणे ग्रहणे वारणेच (१०–उ.) । १३ लुट् (अ) प्रतिघाते विलोडने च (४–प.) । १४ लुट् (अ) प्रतिघाते (१–आ.) । १५ लुट् (अ) भाषार्थः (१०–प.) । १६ गर्ह् (अ) कुत्सायाम् (१–आ.) । १७ गर्ह् (अ) विनिन्दने (१०–प.) णिजभावः । १८ गर्ह् (अ) " (१०-उ.) १९ द्राघ् (ऋ) सामर्थ्ये (१–आ.) । २० द्राह् (ऋ) निद्राक्षये (१–आ.) । २१ द्राख् (ऋ) शोषणालमर्थयोः (१–प.) ।

क्षिणाति[1] दुरितं दृष्ट्वा क्षिणोत्यर्थे[2] च दुःखितम् ॥
भृत्यानां नित्यमज्ञानं यः क्षेणोति[3] सदुक्तिभिः ॥ १० ॥
हिण्डन्ते[4] ये मृषा रात्रौ परस्त्रीषु हिडन्ति[5] ये ॥
हेडते[6] नीतिसंपन्नो बान्धवानपि तानसौ ॥ ११ ॥
दण्डं जोडयति[7] द्विट्सु वधं तेषां च जोडति[8] ॥
अद्धा समिद्धः क्रोधेन रिपूनपि जुडत्यसौ[9] ॥ १२ ॥
क्षयति[10] प्रत्यहं पापं क्षायति[11] द्विषतां कुलम् ॥
यशः क्षियति[12] रोदस्योर्यस्य धर्मरतात्मनः ॥ १३ ॥
अन्नं राध्नोति[13] विप्रार्थं व्यञ्जनानि च रध्यति[14] ॥
यत्प्रसादाज्जनः सर्वः सततं राध्यति[15] श्रिया ॥ १४ ॥
यो मूषति[16] परद्रव्यं तस्य मुष्णाति[17] यः शिरः ॥
मुष्यत्यपहृतार्थानां[18] दुःखं धनसमर्पणात् ॥ १५ ॥
भक्त्यार्चयति[19] यो विप्रान् गुरून् देवांस्तथाऽर्चति[20] ॥
अर्चन्ते[21] चरणौ यस्य मौलिरत्नांशुभिर्नृपाः ॥ १६ ॥

---

१ क्षी (ष्) हिंसायाम् (९–प.)। २ क्षिणु (उ) हिंसायाम् (८–उ.) संज्ञापूर्वको विधिरनित्य इति गुणो न भवतीत्यात्रेयादयः भवत्येवेत्यन्ये । ३ " गुणः । ४ हिड् (इ) [ हिण्ड ] गत्यनादरयोः । (१–आ.) । ५ हिल् (अ) भावकरणे (६–प.) लडयोः सावर्ण्याड्डुकारस्य प्रयोगो बोध्यः । ६ हेड् (ऋ) अनादरे (१–आ.) । ७ जुड् (अ) प्रेरणे (१०–उ.) । ८ जुड् प्रतर्दने (१–प.) ९ जुड् (अ) गतौ (६–प.) । १० क्षी (ञ्) हिंसायाम् (१–उ.) । ११ क्षै (०) क्षये (१–प.) । १२ क्षि (०) निवासगत्योः (६–प.) इयङ् (इय्)। १३ राध् (अ) संसिद्धौ, (५–प.) । १४ रधू (अ) हिंसासंराद्धयोः (४–प.) । १५ राध् (अ) वृद्धौ (४–प.) १६ मूष् (अ) स्तेये (१–प.) । १७ मुष् ( ) स्तेये (९–प.) । १८ मुष् (अ.) खण्डने (४–प.) । १९ अर्च् (अ) पूजायाम् (१०–उ.) २० अर्च् (अ.) " (१–प.) । २१ चान्द्रमतेनात्मनेपदम्.

बहु व्ययति[1] द्रव्यं तदर्थं च व्ययत्यरीन्[2] ।
व्याययत्[3]यशोबिम्बं त्रैलोक्यादर्शमण्डले ॥ ११७ ॥
अर्दति[4] द्विषतां दर्पानर्दते[5] दुरितोदयम् ।
यश्चार्दयति[6] दारिद्र्यं दीनानां द्रविणं दिशन् ॥ ११८ ॥
स्वदते[7] विविधाहारैः स्वादते[8] च गिरां रसम् ।
आस्वादयति[9] सर्वेषां विषयाणां सुखानि यः ॥ ११९ ॥
यत्र विच्छयरिव्यूहं[10] तत्र विच्छायति[11] स्वयम् ।
विच्छाययति[12] तत्रासौ भूपतीनां मुखश्रियम् ॥ १२० ॥
न बिभेति[13] नरेन्द्रेभ्यो देवेभ्यो न च भेषति[14] ॥
एकस्माद् भेषते[15]ऽधर्मात् कुर्याद्यस्तदतिक्रमम् ॥ १२१ ॥
यः कृणत्ति[16] गुणग्रामं कृन्तत्यरि[17]शिरांसि यः ।
कीर्तयन्ति[18] च गोष्ठीषु यद्गुणानमराङ्गनाः ॥ १२२ ॥
न्यञ्चति[19] प्रत्यहं मोहो यस्य नाञ्चन्ति[20] चारयः ।
अञ्चयन्ति[21] सदा यं च गुणाः सर्वातिशायिनः ॥ १२३ ॥
न कुथ्नाति[22] च दुःखार्तः शीतार्तश्च न कुन्थति[23] ।
तस्य राष्ट्रे धनाढ्यो वा मृतः कोपि न कुथ्यति[24] ॥ १२४ ॥

---

१ व्यय (०) वित्तसमुत्सर्गे (१०—उ.) । २ व्यय् (अ) गतौ (१—उ.) । ३ व्ये (ञ्) संवरणे (१—उ.) । णिजन्तस्य रूपम् । ४ अर्द् (अ) हिंसायाम् (१०—उ.) णिजभावः । ५ ” । ६ ” णिजन्तस्य रूपम् । ७ ष्वद् (अ) [ स्वद् ] आस्वादने (१—आ.) । ८ स्वाद् (अ) ” (१—आ.) । ९ ” (१०—उ.) । १० विच्छ् (अ) गतौ (६—प.) । ११ विछ् (अ) गतौ (६—प.) गुपूधूपेत्यायः । १२ ” तस्यैव णिचि रूपम् । १३ भी (ञि) भये (३—प.) । १४ भेष् (ऋ) ” (१—उ.) । १५ ” । १६ कृत् (ई) वेष्टने (७—प.) । १७ कृत् (ई) छेदने (६—प.) नुम् । १८ कॄत् (अ) संशब्दने (१०—उ) । १९ अच् (इ) गतियाचनादिषु (१—उ.) । २० अञ्च् (उ) गतिपूजनयोः (१—प.) । २१ अञ्च् (उ) विशेषणे (१०—उ.) । २२ कुथ् (अ) संश्लेषणे (९—प.) । २३ कुथ् (इ) हिंसाक्लेशनयोः (१—प.) नुम् (न्) । २४ कुथ् (अ) पूतीभावे (४—प.) ।

विचारयति[1] यो धर्मं विद्वद्भिर्ब्राह्मणैः सह ।
विचरत्[2]यस्य लोके च शरच्चन्द्रोज्ज्वलं यशः ॥ १२५ ॥
अविद्यानिद्रया क्रान्ते जगत्येकः स चेतति[3] ।
धिया चेतयते[4] सर्वं परस्य हृदयस्थितम् ॥ १२६ ॥
यो भुजाभ्यां भुवो भारं भरते[5] भरतोपमः ॥
बिभर्ति[6] च यशोराशिं भूपतेर्यस्य भूरपि ॥ १२७ ॥
यस्य रोषारुणा दृष्टिर्धावते[7] तस्य शत्रवे ॥
पाशपाणिस्ततस्तस्मिन् यमदूतोऽपि धावति[8] ॥ १२८ ॥
शास्त्रेण स्तोभते[9] प्रायो लघुप्रकृतिको नरः ॥
निष्टभ्नाति[10] महात्मासौ न नीतेरच्युतस्तुतः ॥ १२९ ॥
हते भर्तरि दुःखार्ताः क्लिन्दन्ति[11] यदरिस्त्रियः ।
अजस्रैरश्रुभिस्तासां क्लिद्यन्ति[12] नयनानि च ॥ १३० ॥
प्रणिङ्क्ते[13] दक्षिणीयानां विप्राणां चरणौ च यः ।
यत्पादौ मौलिरत्नांशुजालैर्नेनेक्ति[14] राजकम् ॥ १३१ ॥
न सन्धयति[15] केनापि यः सर्वविजयी नृपः ।
सन्दधाति[16] धनुष्येव योन्तकाले च सायकम् ॥ १३२ ॥

---

१ चर् (अ) संशये (१०–उ.) । २ चर् (अ) गतौ भक्षणे च (१–प.) । ३ चित् (ई) संज्ञाने (१–प.) । ४ चित् (अ) संचेतने (१०–आ.) । ५ भृ (ञ्) भरणे (१–उ.)। ६ भृ (डु–ञ्) धारणपोषणयोः (३–उ.) । ७ धाव् (उ) गतिशुद्धयोः (१–उ.) ८ सृ (०) गतौ (१–प.) पाघ्राध्मेति धावादेशः । ९ ष्टुभ् (उ) [स्तुभ्] स्तम्भे (१–आ.) । १० स्तुन्भ् (उ) रोधने निष्कोषणे च (९–प.) । ११ क्लिद् (इ) [क्लिन्द्] परिदेवने (१–प.)। १२ क्लिद् (ऊ) आर्द्रीभावे (४–प.)। १३ णिज् (इ) [निञ्ज्] शुद्धौ (२–आ.) णो न (२२८६) इति नत्वम् । १४ णिज् (इर्) [निज्] शौचपोषणयोः (३–उ.) निजां त्रयाणां (२५०२) मित्यभ्यासस्य गुणः । १५ धे (ट्) पाने (१–प.) अयं समुपसर्गयोगेन सन्धानार्थो ज्ञेयः । १६ धा (डु–ञ्) धारणपोषणयोः (३–उ.) ।

मौर्व्या यो द्विषतां दर्पं भञ्जयन्[1]स्वाञ्जनेयवत् ।
भनक्ति[2] कामिनीनां च दृशो मानमनङ्गवत् ॥ १३३ ॥
यो वेवेक्ति[3] च वेदान्तं शास्त्राभ्यासेन सर्वदा ।
विविनक्ति[4] पृथग्भूतं भूतेषु च धनं च यः ॥ १३४ ॥
आप्यायन्ते[5] यतः प्राप्य यज्ञभागं दिवौकसः ॥
तद्दत्तधनसंपद्भिराप्यायन्ते[6] च यत्प्रजाः ॥ १३५ ॥
यो हि व्यायच्छते नित्यमसौ किल न मेदते[7] ।
अतिव्यायामशीलोऽसौ महाकायो न मेद्यति[8] ॥ १३६ ॥
युद्धे कृणाति[9] शत्रूणां कंधरां बाणवृष्टिभिः ॥
दत्वा बाणप्रहारं च तेषां क्रीणाति[10] यः श्रियम् ॥ १३७ ॥
घृतार्चित इवार्चिष्मान् चर्चते[11] यो रणाङ्गणे ॥
चर्चयन्[12]संब्रुवाणश्च चर्चते[13] च परैः सह ॥ १३८ ॥
धावन्त्या[14]धोरणाक्रान्ते विनीता यस्य वारणाः ॥
जात्या धुर्याश्च धूर्यन्ते[15] सादिभिः साधु साधिताः ॥ १३९ ॥
यस्मिन्नभ्युदिते राज्ञि संकोचति[16] तमः क्षितौ ॥
संकुचन्त्य[17]रिनारीणां मुखपङ्केरुहद्युतिः ॥ १४० ॥

---

१ भज् (इ) [भञ्ज्] आमर्दने (१०–उ.) । २ भञ्ज् (ओ) ” (७–प.) । ३ विज् (इर्) पृथग्भावे (३–उ.) अभ्यासगुणः । ४ विच् (इर्) ” (७–उ.) । ५ प्याय् (ओ–ई) वृद्धौ (१–आ.) । ६ प्यै (०) ” । ७ मिद् (ञि–आ.) स्नेहने (१–आ.) । ८ मिद् (ञि–आ) ” (४–प.) । ९ कॄ (ञ्) हिंसायाम् (९–उ.) प्वादित्वाद् ह्रस्वः । १० क्री (डुञ्.) द्रव्याविनिमये (९–उ.) । ११ चर्च् (अ) परिभाषणहिंसातर्जनेषु (१–प.) चान्द्रादिमतेनात्मनेपदम् १२ चर्च् (अ) अध्ययने (१०–उ.) । १३ चर्च् (अ) परिभाषणभर्त्सनयोः (६–प.) । १४ धाव् (उ) गतिशुद्धयोः (१–उ.) । १५ धूर् (ई) हिंसागत्योः (४–आ.) । १६ कुच् (अ) संपर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु (१–प.) । १७ कुच् (अ) संकोचने (६–प.) ।

नावद्यं घोषते[1] यस्य द्वारि कश्चिद्भयद्रुतः ॥
घोषयन्ति[2] परं सर्वे दीर्घमायुः सदाऽर्चिताः ॥ १४१ ॥
उड्डीयन्ते[3] शरा यस्य कोटिशः समराङ्गणे ॥
भग्नानामपि सैन्यानामुड्डयन्ते[4] रजांसि च ॥ १४२ ॥
यो लिङ्गानुमयेति[5] कृत्स्नान् विविधचेष्टितान् ॥
न चानुमाययत्यन्यस्तस्य[6] यच्चेतसि स्थितम् ॥ ४३ ॥
मृद्नाति[7] विद्विषां दर्पं[8] यो भुजाभ्यां भुवः पतिः ॥
मृदन्ते[8] चरणौ यस्य विद्विषः शरणं गताः ॥ १४४ ॥
मिलन्ति[9] प्रत्यहं यस्य वाजिवारणसम्पदः ॥
मीलन्ति[10] रिपुनारीणां मुखपद्मवनानि च ॥ ॥ १४५ ॥
यस्य नाघोटते[11] दण्डः कुट्टनार्थः कुतश्चन ॥
न्याघुटन्ति[12] विपक्षाश्च ये संमुखमुपागताः ॥ १४६ ॥
यो वाग्मी वाग्मिनां मध्ये वाचमुच्चैः प्रपञ्चते[13] ॥
प्रपञ्चयति[14] यत्कीर्तिं दिङ्मुखेषु महाजनः ॥ १४७ ॥
यस्य न्यायार्जितैर्वित्तैस्त्यज्यमाना दिने दिने ॥
तुष्यन्ति[15] ब्राह्मणा नित्यं तूषन्ति[16] कुलदेवताः ॥ १४८ ॥
मनो नोद्विजते[17] यस्य ददतोऽर्थमहर्निशम् ॥
उद्विनक्ति[18] तु संसारादसारादात्मवेदिनः ॥ १४९ ॥

---

१ घुष् ( इर् ) विशब्दने ( १–आ. ) । २ घुष् ” ( १०–उ. ) । ३ डी ( ङ् ) विहायसा गतौ ( ४–आ. ) । ४ ” ( १–आ. ) । ५ मी ( ० ) गतौ ( १०–प. ) णिजभावः । उपसर्गेण भिन्नार्थः । ६ ” ( १०–उ. ) णिचि रूपम् । ७ मृद् ( अ ) क्षोदे ( ९–प. ) । ८ । अयं तुदादौ गणनीयः । ९ मिल् ( अ ) श्लेषणे ( ६–प. ) । १० मील् ( अ ) निमेषणे ( १–प. ) । ११ घुट् ( अ ) परिवर्तने ( १–आ. ) । १२ घुट् ( ० ) । १३ पच् ( इ ) [ पञ्च् ] व्यक्तीकरणे ( १–आ. ) । १४ पच् ( इ ) [ ” ] विस्तारवचने । ( १०–उ ) । १५ तुष् ( अ. ) तुष्टौ ( ४–प. ) । १६ तूष् ( अ ) ” ( १–प. ) । १७ विज् ( ओ–ई ) भयचलनयोः ( ६–आ. ) १८ विज् ( ओ–ई. ) ” ( ७–प. ) ”

नेदते[1] न जनं कंचित् स्वामी यः समदर्शनः ॥
न निन्दति[2] परीवादं परस्याभिरुषाऽति यः ॥ १९० ॥
पितॄन् पूरयति[3] श्राद्धे हव्यैः कव्यैश्च सर्वदा ॥
पूर्यन्ते[4] पितरस्तं च प्रसादैरुदितोदितैः ॥ १९१ ॥
प्रकाशते[5] यथा व्योम्नि चन्द्रः संपूर्णमण्डलः ॥
प्रकाश्यते[6] तथा भूमौ स प्रजानयनोत्सवः ॥ १९२ ॥
न प्रगल्भायते[7] मिथ्याकथनैर्यः कदाचन ॥
आजौ प्रगल्भते[8] दोर्भ्यां रिपोर्विघटयन् घटाः ॥ १९३ ॥
यज्ञवाटे द्विजातिभ्यो दातुं तुष्यति[9] यो धनम् ॥
श्वेतदेवक्षतिव्याजाद्यशस्तूषयतीव[10] यः ॥ १९४ ॥
विनापराधमारण्यान् न खेटति[11] मृगानसौ ॥
खेटयत्यरिवीरांश्च[12] पापर्द्धिरसिकान् बहून् ॥ १९५ ॥
मनुते[13] मनुतुल्योसौ प्रजामात्मजवत् प्रभुः ॥
पितृवन्मन्यते[14] तं च मान्यं जनपदः सदा ॥ १९६ ॥
चित्रैश्चित्रयति[15] व्योम स रत्नाभरणांशुभिः ॥
गरीयसा चरित्रेण यस्य चित्रीयते[16] जनः ॥ १९७ ॥
न प्रकुप्यति[17] विप्राय कुप्यते स महाप्रभुः ॥

---

१ णेद् ( ऋ ) [ नेद् ] कुत्सायाम् ( १—उ. ) । २ णिद् ( इ ) [ निन्द् ] " ( १—प. ) । ३ पूर् ( ई ) आप्यायने ( १०—उ. ) । ४ पूर् ( ई ) ,, ( ४—आ. ) । ५ काश् ( ऋ ) दीप्तौ ( १—आ. ) । ६ " ( ४—आ. ) । ७ नामधातुरयम् । ८ गल्भ् ( अ ) धार्ष्ट्ये ( १—आ. ) । ९ तुष् ( अ ) तुष्टौ ( ४—प. ) । १० तूष् ( अ ) " ( १—प. ) णिजन्तस्य रूपम् । ११ खिट् ( अ ) त्रासे ( १—प. ) । १२ खेट् ( अ ) भक्षणे ( १०—उ. ) । १३ मन् ( उ ) अवबोधने ( ८—आ ) १४ मन् ( अ ) ज्ञाने ( ४—आ. ) । १५ चित्र् ( ० ) चित्रीकरणे ( १०—उ. ) । १६ चित्र ( ङ् ) आश्चर्ये ( नामधातुः—आ. ) नमोवरी- ( २६७५ ) ति क्यच । १७ कुप् ( अ ) क्रोधे ( ४—प. ) ।

प्रकोपयति[1] तस्मै स यस्तेन सदृशोऽपरः ॥ १५८ ॥
ईडते[2] विष्टपास्थाने यद्गुणांश्चारणव्रजाः ॥
स्वयं पुलकितो हर्षाद् बिडौजा ईडयत्यपि[3] ॥ १५९ ॥
अङ्कते[4] पुण्यतीर्थेषु प्रस्तरेष्वतिशक्तिमान् ॥
अङ्कयत्यरिसैन्यानि[5] विचित्रैर्युधि सायकैः ॥ १६० ॥
निःशेषयति[6] यः शत्रून् शेषदीर्घभुजद्वयः ॥
निःशेषति[7] च दानेन भाण्डागारं दिने दिने ॥ १६१ ॥
सुलभं सस्यमुञ्छन्ति[8] यद्देशे व्रतिनो जनाः ॥
उच्छन्ति[9] च वराल्लब्धेनार्थेन परिपूरिताः ॥ १६२ ॥
परमुद्वासयन्त्येके[10] ये भिक्षाव्रतचारिणः ॥
न दीनदुःखितास्ते स्युर्ये वसन्त्यस्य[11] मण्डले ॥ १६३ ॥
न काङ्क्षत्यनृतं[12] कश्चिन्न वाञ्छति[13] परस्त्रियम् ॥
सर्वोऽपि धार्मिकस्तत्र तस्य राष्ट्रे स्थितो जनः ॥ १६४ ॥
उद्घटते[14] न कस्यापि कर्म धर्मपरायणः ॥
उद्घाटयति[15] गोष्ठीषु सर्वेषामेव यो गुणान् ॥ १६५ ॥
स्तेपन्ते[16] यस्य वक्त्रेन्दोर्लावण्यामृतबिन्दवः ॥
यं वीक्ष्य तेपते[17] स्त्रीणां वपुः स्मरशराहतम् ॥ १६६ ॥

---

१ कुप् (अ) उक्तार्थः " (१०-उ.) । २ ईड् (अ) स्तुतौ (२-आ.) आत्मनेपदे (२२९८) ष्विति अन्तस्य अत् । ३ ईड् (अ) " (१०-उ.) । ४ अक् (इ) [अङ्क्] लक्षणे (१-आ.) ५ अङ्क (०) पदे लक्षणे च (१०-उ.) । ६ शिष् (अ) असर्वोपयोगे (१०-उ.) । ७ शिष् (अ) " (१०-प.) णिजभावः । ८ उञ्छ् (इ) [उञ्च्छ्] उञ्छे (१-प.) । ९ उच्छ् (ई) विवासे (६-प.) । १० वास (०) उपसेवायाम् (१०-उ.) । ११ वस् (अ) निवासे (१-प.) । १२ काक्ष् (इ) [काङ्क्ष्] काङ्क्षायाम् (१-प.) १३ वाञ्छ् (इ) [वाञ्छ्] इच्छायाम् (१-प.) । १४ घट् (अ) चेष्टायाम् (१-आ.) । १५ घट् (अ) संघाते (१०-उ.) । १६ ष्टिप् (ऋ) [स्तेप्] क्षरणे (१-आ.) । १७ तेप् (ऋ) कम्पने (१-आ.) ।

हल्लन्ति[1] हस्तिपृष्ठेषु सेनान्यः कोटिशः पुरः ॥
हर्यन्ति[2] हरयोऽसंख्या यस्य नागाश्च निर्गमे ॥ १६७ ॥
एकोपि विसृजत्याजौ[3] बाणवृष्टिमरातिषु ॥
यस्योपरि विसृज्यन्ते[4] पुष्पवृष्टिं च खेचराः ॥ १६८ ॥
क्षमते[5] यो दरिद्राणां लक्षमप्यागसां प्रभुः ॥
न क्षाम्यति[6] क्षितीशानामपराधकणानपि ॥ १६९ ॥
तितिक्षते[7] क्षमी यस्तु सापराधेषु साधुषु ॥
तेजयन्ति[8] यमश्रान्तं बन्दिवृन्देरिता गिरः ॥ १७० ॥
यस्य योगनिषक्तस्य भोगतृष्णा श्लथायते[9] ॥
श्लथते[10] दीर्घसंसारग्रन्थिमात्मविनिश्चयात् ॥ १७१ ॥
विश्राणयति[11] यः श्रीमान् शिष्टेभ्यो विपुलं वसु ॥
विश्रणन्ति[12] च ते यस्मै सत्यवाचः शुभाशिषः ॥ १७२ ॥
व्यायामदृढदेहोपि मन्दते[13] यो न सुन्दरः ॥
मन्दायते[14] क्वचित् कार्ये परार्थे न च कर्हिचित् ॥ १७३ ॥
अपमृत्युं परित्यज्य सुखं प्राणिति[15] यत्प्रजा ॥
न प्राण्यते[16] परं तस्य प्रतिकूलं करोति यः ॥ १७४ ॥
योऽवलुम्पति[17] पूर्वेषां राज्ञां कीर्तिं यदानने ॥

---

१ हल्ल् (अ) कासने (१–प.)। २ हर्य् (अ.) गतिकान्त्योः (१–प.)। ३ सृज् (अ) विसर्गे (६–प.)। ४ सृज् (अ.) " (४–आ.)। ५ क्षम् (ऊष्) सहने (१–आ.)। ६ क्षम् (ऊ) " (४–प.) शमामष्टाना (२५१९) मिति दीर्घः। ७ तिज् (अ) क्षमायाम् (१–आ.) स्वार्थे सन्नन्तस्य रूपम्। ८ तिज् (अ) निशाने (१०–उ.)। ९ श्लथ (०) नामधातुरयम् (उ.) लोहितादी (२६६८) ति क्यष्। वा क्यष (२६६९) इति पदविकल्पः। १० श्लथ् (अ) शैथिल्ये (१–आ.)। ११ श्रण् (अ) दाने (१०–उ.)। १२ श्रण् (अ, म्) " (१–प.) १३ मद् (इ) [मन्द्] स्तुतिमोदमदस्वप्नकान्तिगतिषु (१–आ.)। १४ मन्द–(नामधातुः–आ.)। १५ अन् (अ) प्राणने (२–प.) णत्वम्। १६ अण् (अ) " (४–आ.)। १७ लुप् (ऌ) छेदने (६–उ.)।

उच्चुलुम्पाति[1] लावण्यं नेत्राञ्जलिपुटैर्जनः ॥ १७५ ॥
दधते[2] यः सदाचारं सदा चारणसंस्तुतः ॥
दधते[3] शासनं यस्य शिरसा च नरेश्वराः ॥ १७६ ॥
ददते[4] द्रविणं भूरि ब्राह्मणेभ्यः सदैव यः ॥
ददते[5] ब्राह्मणा यस्मै सन्तुष्टा नित्यमाशिषः ॥ १७७ ॥
स्रंसते[6] दुरितं राष्ट्रे प्रजाभ्यो यत्प्रभावतः ॥
प्रेर्यमाणा शरौघेण स्रंसतेऽ[7]रिपताकिनी ॥ १७८ ॥
प्रमादेनापि देवाग्निगुरुभ्यः शपते[8] न यः
साक्षात्कृतागसे कोपाद्दासायापि न शप्यति[9] ॥ १७९ ॥
नटन्ति[10] नाटके यस्य चरितं भरतादयः ॥
नाटयन्ति[11] स्फुटं येषां पताका विक्रमक्रमाः ॥ १८० ॥
होमाग्निधूमसुरभिः पवते[12] मारुतो मृदुः ॥
गोदावरीतरङ्गार्द्रः पुनीते[13] यद्भुवि प्रजाः ॥ १८१ ॥
यो न वञ्चयते[14] कञ्चित् सदा सत्यपरायणः ॥
वञ्चन्ति[15] च शरच्चन्द्रशुचयो दिक्षु यद्गुणाः ॥ १८२ ॥
योऽधिमीमांसति[16] मीमांसां तदर्थमनुतिष्ठति ॥
पशवोऽपि न मीमन्ति[17] यद्देशे दुःखपीडिताः ॥ १८३ ॥
सुखं कृषति[18] शालेयमिक्षुक्षेत्रं च कर्षति[19] ॥
यत्प्रसादादविज्ञातक्लेशो जनपदः सदा ॥ १८४ ॥

---

१ चुलुम्प् इति लुप्यर्थको भ्वादौ आकृत्या गणितः (१–प)। २ दध् (अ) धारणे (१–आ.)। ३ धा (डु–ञ्) धारणपोषणयोः (३–उ.)। ४ दद् (अ) दाने (१–आ.)। ५ दा (डु–ञ्) दाने (३–उ.) ६ स्रंस् (उ) अवस्रंसने (१–आ.)। ७ स्रस् (उ) प्रमादे (१–अ.) ८ शप् (अ) आक्रोशे (१–उ)। ९ शप् (अ) " (४–उ.) १० नट् (अ) नृतौ (१–प.)। ११ नट् " अवस्यन्दने (१०–उ.)। १२ पू (ङ्) पवने (१–आ.)। १३ पू (ञ्) पवने (९–उ.)। १४ वञ्च् (उ) प्रलम्भने (१०–आ.)। १५ वञ्च् (उ) गत्यर्थः (१–प.)। १६ मीम् (ऋ) गतौ शब्दे च (१–प.)। १७ "। १८ कृष् (अ) विलेखने (६–उ.)। १९ कृष् (अ) " (१–प.)।

शीकन्ते[१] शीकरासारैर्वायवो दक्षिणोदधेः ॥
शुभ्रावतीतरङ्गार्द्राः शीकयन्ति[२] च यद्वपुः ॥ १८५ ॥
शब्दायते[३] तदास्थाने नाएष्टस्तेन कश्चन ॥
परं शब्दयति[४] द्वास्थः पात्रागमनबोधनात् ॥ १८६ ॥
विलसन्ति[५] रणे तुष्टा यस्य रङ्गोपजीविनः ॥
लासयन्ति[६] रसाभिज्ञा यस्याग्रे भरतोत्तमाः ॥ १८७ ॥
विलयन्त्य[७]बलानां च हृदये मदनव्यथाः ॥
विलापयन्ति[८] यं दृष्ट्वा गुणवन्तोपि शत्रवः ॥ १८८ ॥
असौ प्रक्रमते[९] युद्धमेकोपि बहुभिः सह ॥
नाक्रामन्ति[१०] तथाप्येनं विक्रान्ता बहवोपि ते ॥ १८९ ॥
वियन्ति[११] वीरसन्तानवृद्धौ यस्य कुलाङ्गनाः ॥
विजायन्ते[१२]ऽवरोधाश्च यत्पुरे गृहवृद्धये ॥ १९० ॥
प्रथते[१३] प्रियवद्यस्य पृथिव्यामुज्ज्वलं यशः ॥
प्रथयन्ति[१४] प्रथीयांसो गुणाः स्वर्गेऽपि निर्मलाः ॥ १९१ ॥
अमन्ति[१५] व्याधयोऽप्येनं न कदाचिद् भयादिव ॥
अमयन्ति[१६] यमन्यं च तमनामीकरोति सः १९२ ॥

---

१ शीक् (ऋ) सेचने (१—आ.) । २ शीक् (अ) " (१०—उ.)। ३ शब्द—नामधातुरयम् शब्दवैरकलहे (२६७३) ति क्यङ्, वृद्धिः । ४ शब्द् (अ) आविष्कारे (१०—उ.) । ५ लस् (अ) श्लेषणक्रीडनयोः (१—प.) । ६ लस् (अ) शिल्पयोगे (१०—उ.) । ७ ली (०) द्रवीकरणे (१०—प.) णिजभावः । ८ " णिजन्तस्य रूपम् । अर्तिह्रीत्यादिना पुगागमः । ९ क्रम् (उ) पादविक्षेपे (१—प.) प्रोपाभ्या-(२७१९)मिति प्रारम्भार्थकत्वमात्मनेपदं च बोध्यम् । १० " क्रमः परस्मै—(२३२२) इति दीर्घः । ११ वी (०) गतिव्याप्तिप्रजनकान्त्यसनखादनेषु (४—प.) अचि श्नुधात्विनीयङ् (इय्) । १२ जन् (ई) प्रादुर्भावे (४—आ.) ज्ञाजनो (२५११) रिति जा । १३ प्रथ् (अ, ष्, म्) प्रख्याने (१—आ.) । १४ प्रथ् (अ) " (१०—उ.) । १५ अम् (अ) गतिशब्दसंभक्तिषु (१—प.) । १६ अम् (अ) रोगे. (१०—उ.)।

विष्णाति[1] विषवत् प्राणांस्त्रयीधर्मद्विषामसौ ॥
वेवेष्टि[2] विष्टपं तस्य कीर्तिः सर्वातिशायिनः ॥ १९३ ॥
निःशेषं शेषति[3] क्रोधात् प्रतिपक्षक्षमापतीन् ॥
एकं शेषति[4] यः शेषे भूभारभरणे ध्रुवम् ॥ १९४ ॥
क्षिपति[5] प्रतिपक्षाणां हृदये भक्षजं ज्वरम् ॥
क्षिप्यन्ति[6] श्रोत्रियाणां च निःकम्पेक्षणमत्र ये ॥ १९५ ॥
लपति[7] स्निग्धया वाचा सर्वैरेव समं प्रभुः ॥
सकृद्दृष्टेन च प्रेम्णा साह्लादं लापयत्यसौ[8] ॥ १९६ ॥
यौति[9] काले कुलस्त्रीभिः क्षत्रसन्तानवृद्धये ॥
युनाति[10] यौवनस्थोऽपि वेश्यायां बन्धकीजने ॥ १९७ ॥
न रोजयति[11] यः कांश्चित् प्राणिनः करुणान्वितः ॥
तस्य धर्मरते रोगा न रुजन्ति[12] प्रजा अपि ॥ १९८ ॥
अन्तर्विद्यानसौ विप्रान् न म्लेच्छति[13] धृतव्रतः ॥
न म्लेच्छयति[14] धर्मज्ञो विवादे वादिभिः सह ॥ १९९ ॥
संपश्यते[15] मतिर्यस्य त्रैलोक्येऽपि स्वगेहवत् ॥
संपश्यति[16] परः सेनां सागरान्ते महीतले ॥ २०० ॥
विलोक्य यं विघटते[17] कोपाटोपो मृगीदृशाम् ॥

---

१ विष् ( अ ) विप्रयोगे ( ९–प. ) । २ विष् ( ऌ ) व्याप्तौ ( ३–उ. ) निजां त्रयाणा ( २५०२ ) मित्यभ्यासस्य गुणः । ३ शिष् ( अ ) हिंसायाम् ( १–प. ) । ४ शिष् ( अ ) असर्वोपयोगे ( १०–प. ) णिजभावो वा । ५ क्षिप् ( अ ) प्रेरणे ( ६–उ. ) । ६ " ( ४–प. ) । ७ लप् ( अ ) व्यक्तायां वाचि ( १–प. ) । ८ स एव णिजन्तः । ९ यु ( ० ) मिश्रणे अमिश्रणे च ( २–प. ) । १० यु ( ञ् ) बन्धने ( ९–उ. ) अत्रा-मिश्रणमर्थः सम्यागिति भाति । ११ रुज् ( अ ) हिंसायाम् ( १०–उ. ) । १२ रुज् ( ओ ) भङ्गे ( ६–प. ) । १३ म्लेच्छ् ( अ ) अव्यक्ते शब्दे ( १०–प. ) णिजभावः । १४ " ( १०–उ. ) १५ दृश् ( इर् ) [ पश्य् ] प्रेक्षणे ( १–आ. ) अर्तिश्रुदृशिभ्य इति वार्तिकेन समुपसर्गवशादा-त्मनेपदम् । १६ " ( १–प. ) । १७ घट् ( अ म् ष् ) चेष्टायाम् ( १–आ. ) ।

विघाटयति[1] चास्फोटन् वैरिणां करिणां घटाः ॥ २०१ ॥
मुखं निंस्ते[2] मुखं स्त्रीणां यत्प्रजा प्रीतिपालिता ॥
निक्षति[3] स्तनवक्त्रोरुकपोलाक्षिललाटकम् ॥ २०२ ॥
निस्तनन्ति[4] न दुःखार्तास्तद्देशे निरुपद्रवे ॥
स्तनयत्युग्रशब्देन[5] पर्जन्योपि न भीतवत् ॥ २०३ ॥
रसन्ति[6] मधुरैः कण्ठैर्यस्योद्याने पतत्रिणः ॥
रसयन्ति[7] च हृद्यानि तत्फलान्यनिवारिताः ॥ २०४ ॥
लजते[8] लाञ्छनस्येन्दोः क्षत्रियो श्रोत्रियो ह्यसौ ॥
लज्जते[9] लज्जतीनां च वार्ताकर्णनतोपि यः ॥ २०५ ॥
यस्तोलयति[10] दारिद्र्यकर्दमे पतितान्नरान् ॥
तुलयत्यपि[11] देवेन्द्रं संग्रामे भुजविक्रमात् ॥ २०६ ॥
न शोचति[12] शुभाचारो यो मृतानपि बान्धवान् ॥
[13]शोचयत्यतिनिःसारं संसारं सारधीरसौ ॥ २०७ ॥
नाहिर्दशयते[14] कंचित्तत्कृत्यगरुडाज्ञया ॥
यदि प्रमादाद्दशति[15] तस्मिन्न क्रमते विषम् ॥ २०८ ॥
यं परिक्षिप्य लक्षं हि पदयन्ते[16] पदातयः ॥
आहवे जयलक्ष्मीश्च तस्य संपद्यते[17] ध्रुवम् ॥ २०९ ॥

---

१ घट् (अ) संघाते (१०–उ.)। २ णिस् (इ) [निंस्] चुम्बने (२–आ.)। ३ णिक्ष् (अ) [निक्ष्] " (१–प.)। ४ ष्टन् (अ) [स्तन्] शब्दे (१–प.)। ५ स्तन (०) देवशब्दे (१०–उ.) ६ रस् (अ) शब्दे (१–प.) । ७ रस (०) आस्वादनस्नेहनयोः (१०–उ.)। ८ लज् (ओ–ई) व्रीडने (६–आ.) । ९ लस्ज् (ओ–ई) [लज्ज्] " (६–आ.) । १० तुल् (अ) उन्माने (१०–उ.)। ११ तुला (०) नामधातुरयम्। १२ शुच् (अ) शोके (१–प.)। १३ स एव णिजन्तो ज्ञेयः। १४ दश् (इ) [दंश्] दंशने (१०–आ.) । १५ दंश् (अ) [दश्] दशने (१–प.)। अत्र दंशसञ्जस्वञ्जां शपी (२३९६) त्यनुस्वारलोपः। १६ पद (०) गतौ (१–आ.)। १७ पद् (अ) " (४–आ.)।

योऽत्र लाभयते[1] व्यूहं प्रतिपक्षक्ष्माभुजाम् ॥
लभते[2]ऽर्थं ततो भूमिहेमहस्तिहयादिकम् ॥ २१० ॥
श्रियो हृत्वाऽपि शत्रूणां न प्रहर्षति[3] यः श्रिया ॥
यथा प्रहृष्यति[4] श्रुत्वा सत्कवीनां सुभाषितम् ॥ २११ ॥
धर्मसर्वस्वदानेऽपि योहि दोलायते[5] न च ॥
दोलयत्य[6]रिवर्गस्य जीविताशां च यः सदा ॥ २१२ ॥
वाहते[7] वाहिनीं हन्तुं बाहुभ्यामाहवे बुधः ॥
वहते[8] विहतारातेर्बहुरूपां च यः श्रियम् ॥ २१३ ॥
स्वेदते[9] किल सर्वोंपि वपुष्मानूष्मणाऽन्वितः ॥
न तु स्विद्यति[10] तस्याङ्गं व्यायामजितमेदसः ॥ २१४ ॥
अतिचित्राणि वस्त्राणि व्यूयन्ते[11] यस्य कौतुकात् ॥
विज्ञानिका वयन्ते[12] च व्ययन्ते[13] पट्टिकादिकम् ॥ २१५ ॥
ऊर्जन्ति[14] विविधाभिश्च विद्याभिर्यस्य वारणाः ॥
ऊर्जयन्ति[15] च दानेन सन्मानेन पदातयः ॥ २१६ ॥
आयच्छति[16] रणे मौर्वीमसौ यावद् विधित्सया ॥
तावदार्च्छति[17] शत्रूणां त्रस्यतां रणपद्धतिः ॥ २१७ ॥

---

१ लाभ ( ० ) प्रेरणे ( १०—उ. ) । २ लभ् ( डु, अ, ष्. ) प्राप्तौ ( १—आ. ) । ३ हृष् ( उ ) अलीके ( १—प. ) । ४ हृष् ( अ ) तुष्टौ ( ४—प. )। ५ दोलेति नामधातुरयम् कर्तुः—( २६६५ ) क्यङ् । ६ दुल् ( अ ) उत्क्षेपे ( १०—उ. ) । ७ वाह् ( ऋ ) प्रयत्ने ( १—आ. ) । ८ वह् ( अ ) प्रापणे ( १—उ. ) । ९ ष्विद् ( ञि—आ. ) [ स्विद् ] स्नेहनमोचनयोः ( १—आ. ) । १० ष्विद् ( आ ) [ स्विद् ] गात्रप्रक्षरणे ( ४—प. ) । ११ ऊय् ( ई ) तन्तुसन्ताने ( १—आ. ) । १२ वे ( ञ् ) " ( १—उ. ) । १३ व्ये ( ञ् ) संवरणे ( १—उ. ) । १४ ऊर्ज् ( अ ) बलप्राणनयोः ( १—प. ) अयमाकृत्या भ्वादौ गण्यते । १५ ऊर्ज् " ( १०—उ. ) । १६ यम् ( अ ) उपरमे ( १—प. ) इषुगमियमामि (२४००) ति छः उपसर्गणाकर्षणार्थः । १७ ऋछ् ( अ ) गतीन्द्रियप्रलयमूर्तिभावेषु ( ६—प. ) ।

मोदयन्ति[1] यदुद्याने सारुणं पुष्परेणवः ॥
हृद्यं तमुग्रमाघ्राय मोदन्ते[2] चतुरस्त्रियः ॥ २१८ ॥
बहिराचमनस्नानप्रायाश्चित्तेन शुच्यति[3] ॥
अन्तः शुचीयते[4] सम्यक् परमात्मविनिश्चयात् ॥ २१९ ॥
यत्प्रजानामुपप्लुत्यै पर्जन्योपि न गर्जति[5] ॥
गर्जयन्ति[6] कथं चान्ये भेदका ये च तस्कराः ॥ २२० ॥
स्नाति[7] गङ्गाजलैर्नित्यं यत्र देशे क्वचिद्वसन् ॥
यः स्नायति[8] जनान् सर्वान् बिसतन्तुसितैर्गुणैः ॥ २२१ ॥
दृढं धर्मे विलग्नस्य यस्य न च्यवते[9] पदम् ॥
चीवति[10] स्वर्गलोकान्तं या कीर्तिः सुकृतात्मनः ॥ २२२ ॥
स्वरति[11] स्निग्धया वाचा सर्वानानन्दयत्यसौ ॥
स्वरय[12]सारिराष्ट्रेऽपि न च कंचित् परिग्रहम् ॥ २२३ ॥
समन्ति[13] यद्वियोगेन सीमन्तिन्यः स्मरातुराः ॥
यः सामयति[14] सामज्ञः स्निग्धैरालोकनैश्च ताः २२४ ॥
हिताहितं प्रजानां यः प्रेक्षते[15] नित्यमात्मनः ॥
प्रेक्षय[16]त्यखिलानां च कर्म तद्विनियोजितम् ॥ २२५ ॥
अभिलष्यति[17] साधूनामुदयं सर्वदेवे यः ॥
साधुलोकोपि निःसीमं तस्याभिलषति[18] श्रियम् ॥ २२६ ॥

---

१ मुद् (अ) संसर्गे (१०–उ.)। २ मुद् (अ) हर्षे (१–आ.)। ३ शुच्य् (अ) अभिषवे (१–प.)। ४ शुचीति नामधातुः। भृशादिभ्य (२६६७) इति क्यङ्। ५ गर्ज् (अ) शब्दे (१–प.)। ६ गर्ज् " (१०–उ.)। ७ ष्णा (०) [स्ना] शौचे (२–प.)। ८ ष्णै (०) [स्नै] बन्धने (१–प.)। ९ च्यु (०) गतौ (१–आ.) १० चीव् (ऋ) आदानसंवरणयोः (१–उ.)। ११ स्वृ (०) शब्दोपतापयोः (१–प.)। १२ स्वर (०) आक्षेपे शब्दे च (१०–उ.)। १३ षम् (अ) [सम्] वैकल्ये (१–प.)। १४ साम (०) सान्त्वप्रयोगे (१०–उ.)। १५ ईक्ष् (अ) दर्शने (१–आ.)। १६ ईक्ष् (अ) " णिजन्तोऽयम्। १७ लष् (अ) इच्छायाम् (१–प.) वा भ्राशेति वा श्यन्। १८ लष् "।

यःस्वप्नेनापि चात्मीयं गुणं क्वापि न कथ्थते[1] ॥
कथयत्यादिराजानां[2] चरितानि सहस्रशः ॥ २२७ ॥
कायः क्राम्यति[3] नाक्रन्दे यस्य प्रहरतो रिपून् ॥
क्रामन्ति[4] रिपुसेनाश्च वेपमाना दिशो दश ॥ २२८ ॥
व्यनक्ति[5] यच्छरीरस्थं लक्षणं सार्वभौमता ॥
आभनक्ति[6] न गोदोहं यद्देशे याज्ञिको जनः ॥ २२९ ॥
आचुटन्ति[7] नखैर्बाहुं मुखमाचोटयन्ति[8] च ॥
यद्बाहुकृतवैधव्या रुदन्त्यो यदरिस्त्रियः ॥ २३० ॥
विपाशयति[9] यः शत्रून् बन्धनैरखिलानपि ॥
विपाशयति[10] चात्मानं ज्ञानात् कर्मक्षयं नयन् ॥ २३१ ॥
घूर्णते[11] शात्रवस्यापि यद्गुणश्रवणे शिरः ॥
मित्रोदासीनवृत्तीनां घूर्णतीति[12] किमद्भुतम् ॥ २३२ ॥
यस्य लक्ष्मीर्विकसति[13] प्रजा धर्मेण रक्षतः ॥
विकसन्ते[14] च भूयांसो गुणाः श्रवणहारिणः ॥ २३३ ॥
किलन्ति[15] ललनाः कामं क्रीडन्ति[16] स्थविरा अपि ॥
अज्ञातव्याधिवैक्लव्यसुखिता यस्य मण्डले ॥ २३४ ॥
यः कूटयति[17] शत्रूणां दृष्ट्वा गजघटा रणे ॥
संकुटन्ति[18] भयाक्रान्ताः शत्रवो यस्य दर्शनात् ॥ २३५ ॥

---

१ कथ्थ् ( अ ) श्लाघायाम् ( १–आ. ) । २ कथ ( ० ) वाक्यप्रबन्धने ( १०–उ. ) । ३ क्रम् ( उ ) ग्लानौ ( ४–प. ) ष्ठिवुक्लमुचमामि-( ३३२० ) ति दीर्घः । ४ " ( १–प. ) । ५ अञ्ज् ( ऊ ) व्यक्तिम्रक्षणकान्तिगतिषु ( ७–उ. ) । ६ भञ्ज् ( ओ ) आमर्दने ( ७–प. ) आङ्पूर्वः । ७ चुट् ( अ ) च्छेदने ( ६–प. ) । ८ चुट् ( अ ) " ( १०–उ. ) । ९ पश ( अ ) बन्धने ( १०–उ. ) । १० विपाश इति नामधातुः तत्करोतीति णिच् । ११ घूर्ण् ( अ ) भ्रमणे ( १–आ. ) १२ घूर्ण् ( अ ) " ( ६–प. ) । १३ कस् ( अ ) गतौ ( १–प. ) १४ कास् ( ऋ ) दीप्तौ ( १–आ. ) । १५ किल् ( अ ) श्वैत्यक्रीडनयोः ( ६–प. ) । १६ क्रीड् ( ऋ ) विहारे ( १–प. ) । १७ कूट ( ० ) परितापे ( १०–उ. ) । १८ कुट् ( अ ) कौटिल्ये ( ६–प. ) ।

क्रपते[1] कृपणेष्वेव कृपयार्जितविक्रमः ॥
प्रचुरं प्रार्थितोप्यर्थं नासौ कल्पयति[2] प्रभुः ॥ २३६ ॥
अजस्रैरश्रुभिः शत्रुस्त्रीणां धौतमिवाधिकम् ॥
यद्यशः श्वेतते[3] दिक्षु क्ष्विन्दते[4] च सुरालये ॥ २३७ ॥
कुशस्थलं पथयति[5] पथयत्यु[6]त्तरापथम् ॥
यद्दण्डखण्डिताशेषप्रचण्डरिपुमण्डलम् ॥ २३८ ॥
द्यां चोच्छलेन मूर्छन्ति[7] यद्गुणाः शशलाञ्छने ॥
न स मूर्छति[8] येनासौ दृष्टः सहृदयः प्रभुः ॥ २३९ ॥
ह्रादते[9] स्निग्धगम्भीरं यद्देशे वर्षुको घनः ॥
ह्लादते[10] यस्य लोकेषु कृषीवलजनोऽप्यलम् ॥ २४० ॥
कृणाति[11] तृणवद्युद्धे शरजालेन यो रिपून् ॥
कुणन्ति[12] विद्रुता यस्य दिङ्मुखेषु रिपुव्रजाः २४१ ॥
लक्ष्मीमालिङ्गति[13] स्नेहाद्यः सदा पुरुषोत्तमः ॥
आलिङ्गयति[14] रत्नानां जालेन मणिकुट्टिमम् ॥ २४२ ॥
यथा सुवति[15] संग्रामे स्वयमेव जने नयम् ॥
सोमं सुनोति[16] यज्ञेषु परलोकजिगीषया ॥ २४३ ॥
मनो मादयते[17] यस्य शास्त्राभ्यासरसायनात् ॥
सर्वलोकातिशायिन्या न विभूत्या स माद्यति[18] ॥ २४४ ॥

---

१ क्रप् ( अ ष् म् ) कृपायां गतौ च । ( १–आ. ) । २ कृप ( ० ) दौर्बल्ये ( १०–उ. )। ३ श्वित् ( आ ) वर्णे ( १–आ. ) । ४ क्ष्विद् ( इ ) [ क्ष्विन्द् ] श्वैत्ये ( १–आ. ) । ५ पथ ( ० ) प्रख्याने ( १०–उ.) ६ पथ् ( इ ) [ पन्थ् ] गतौ ( १–उ. )। ७ मूर्छ् ( आ ) मोहनसमुच्छ्राययोः ( १–प. ) । ८ " । ९ ह्राद् ( अ ) अव्यक्ते शब्दे ( १–आ. ) । १० ह्लाद् ( ई ) सुखे ( १–आ. ) । ११ कॄ ( ञ् ) हिंसायाम् ( ९–उ. ) । १२ कुण् ( अ ) शब्दोपकरणयोः ( ६–प. ) । १३ लिग् ( इ ) [ लिङ्ग् ] गत्यर्थे ( १–प. )। । १४ लिग् ( इ ) " ( १०–उ. ) । १५ षू ( ० ) [ सू ] प्रेरणे ( ६–प. )। १६ षु ( ञ् ) [ सु ] स्नपनपीडनस्नानसुरासन्धानेषु ( ५–उ. ) । १७ मद् ( अ ) तृप्तियोगे ( १०–उ. ) । १८ मद् ( ई ) हर्षे ( ४–प. ) शमादित्वाद्दीर्घः ।

स्निह्यति[1] ज्ञातिवर्गेषु स्नेहयत्यार्यबन्धुषु[2] ॥
रणे शूरयते[3] यश्च शूर्यते[4] द्विषतां गणे ॥ २४५ ॥
यः शीलति[5] सदा धर्मं शीलयत्यात्मनो[6] हितम् ॥
न च स्तमति[7] शोकेन न च दुःखेन ताम्यति[8] ॥ २४६ ॥
छिनत्ति[9] नित्यमज्ञानं छदयत्यहितोदयम्[10] ॥
साध्नोति[11] धीः सदा यस्य साध्यति[12] श्रीश्च भूतले ॥ २४७ ॥
एषते[13] यः सदा मार्गं गवेषयति[14] सुव्रतम् ॥
यत्किंचिदप्यधीतेऽसौ[15] तदध्येति[16] तदक्षरम् ॥ २४८ ॥
आलोचते[17] सदानीतिमालोचयति[18] सत्क्रियाः ॥
आलोकन्ते[19] यमेणाक्ष्यो नालोकयति[20] यश्च ताः ॥ २४९ ॥
यो न कुत्सयते[21] कुत्स्यान् न च कुत्सति[22] लिङ्गिनः ॥
न भर्त्सति[23] विकर्मस्थान् न च भर्त्सयते[24] भूतान् ॥ २५० ॥

---

१ ष्णिह् ( अ ) [ स्निह् ] प्रीतौ ( ४—प. ) । २ ष्णिह् ( अ ) [ स्निह् ] स्नेहने ( १०—उ. ) । ३ शूर ( ई० ) विक्रान्तौ ( १०—आ. ) । ४ शूर् ( ई ) हिंसास्तम्भनयोः ( ४—आ. ) । ५ शील् ( अ. ) समाधौ ( १—प. ) ६ शील ( ० ) उपधारणे ( १०—उ. ) । ७ ष्टम् ( अ ) [ स्तम् ] वैकल्ये ( १—प. ) । ८ तम् ( उ ) कांक्षायाम् ( ४—प. ) दीर्घः । ९ छिदिर् ( इर् ) द्वैधीकरणे ( ७—उ. ) । १० छद ( ० ) अपवारणे (१०—उ.)। ११ साध् ( अ ) संसिद्धौ ( ५—प. ) । १२ साध् ( अ ) " ( ४—प. ) १३ एष् ( ऋ ) गतौ ( १—आ. ) । १४ गवेष ( ० ) मार्गणे ( १०—उ.) १५ इ ( ङ् ) अध्ययने ( २—आ. ) । अयं नित्यमधिपूर्वः । १६ इ ( क् ) स्मरणे ( २—प. ) अयमप्यधिपूर्वः । १७ लोच् ( ऋ ) दर्शने ( १—आ. ) । १८ लोच् " ( १०—उ. ) । १९ लोक् ( ऋ ) " ( १. आ. ) २० " ( १०—उ. ) । २१ कुत्स् ( अ. ) अवक्षेपणे ( १०—आ. ) । २२ " ( १—प. ) । २३ भर्त्स् ( अ ) तर्जने ( १—प. ) । २४ भर्त्स् ( अ ) तर्जने ( १०—आ. ) ।

मण्डयन्ति[1] गुणाः सर्वं यो गुणानेव मण्डति[2] ॥
भूषणं भूषयत्यन्यं[3] स तु भूषति[4] भूषणम् ॥ २९१ ॥
उन्मूलयति[5] यः शत्रुमुन्मूलति[6] तमांसि च ॥
वायुं च पीतयत्यात्मी[7] यः पायत्यरिमण्डलम्[8] ॥ २९२ ॥
निबर्हयति[9] बुद्ध्याऽरीन् स्वयमर्हो निबर्हते[10] ॥
इहार्हयति[11] यः पूजां स्वर्गेऽपीन्द्रत्वमर्हति[12] ॥ २९३ ॥
भक्त्या नमति[13] यो देवान् नमस्यति[14] गुरून् द्विजान् ॥
रुणद्धि[15] रोदसी कीर्त्या सत्सङ्गमनुरुध्यते[16] ॥ २९४ ॥
दिवा निद्रायते[17] नासौ न निद्राति[18] सन्ध्ययोः ॥
न गर्हते[19] परद्रव्यं न च गर्हयते[20] परम् ॥ २९५ ॥
तूर्यते[21] न क्वचित् कार्ये त्वरते[22] धर्म एव यः ॥
ध्वनन्ति[23] यद्गुणान् मर्त्या ध्वनयन्ति[24] च खेचराः ॥ २९६ ॥
तर्जयत्यहितं[25] नान्यं भूमौ तर्जति[26] सज्जनम् ॥
न दुनोति[27] परं वाचा दुर्जनोक्त्या न दूयते[28] ॥ २९७ ॥

---

१ मड् (इ) [मण्ड्] भूषायाम् (१०–उ.) । २ मड् (इ) ,, (१–प.) । ३ भूष् (अ) अलंकरणे (१०–उ.) । ४ ,, (१–प.) ५ मूल् (अ) रोहणे (१०–उ.) । ६ मूल् (अ) प्रतिष्ठायाम् (१–प.) । ७ पीतीति नामधातुः । ८ पै (०) शोषणे (१–प.) । ९ बर्ह् (अ) हिंसायाम् (१०–उ.) । १० बर्ह् (अ) प्राधान्ये (१–आ.) ११ अर्ह् (अ) पूजायाम् (१०–उ.) । १२ अर्ह् (अ) " (१–प.) । १३ नम् (अ) प्रह्वत्वे शब्दे च (१–प.) । १४ नमस् इति नामधातुः क्यच् । १५ रुध् (इर्) आवरणे (७–उ.) । १६ रुध् (अ) कामे (४–आ.) अयं नित्यमनुपूर्वः । १७ निद्रेति नामधातुः तत्करोतीति क्यङ् । १८ द्रै (०) स्वप्ने (१–प.) । १९ गृह् (ऊ) ग्रहणे (१–आ.) । २० गर्ह् (अ) विनिन्दने (१०–उ.) । २१ तुर् (ई) गतित्वरणहिंसनयोः (४–आ.) । २२ त्वर् (ञि, आ, ष् म्) संभ्रमे (१–आ.) । २३ ध्वन् (अ) शब्दार्थः (१–प.) । २४ " (१०–उ.) । २५ तर्ज् (अ) भर्त्सने (१०–उ.) । २६ " (१–प.) । २७ दु (टु) उपतापे (५–प.) । २८ दू (ङ्) परितापे (४–आ.) ।

न सूदते[1] मतिर्यस्य यः सूदयति[2] शात्रवम् ॥
विचिकित्सति[3] स व्याधिं साधु केतयति[4] प्रजाः ॥ २५८ ॥
यो जूषति[5] प्रजारिष्टं जुषते[6] यः सुखं सदा ॥
सत्यं संगिरते[7] यश्च गृणाति[8] शुभगं वचः ॥ २५९ ॥
यो भुङ्क्ते[9] भुवने राज्यं यस्य श्रीर्न भुजत्यलम्[10] ॥
पलन्ति[11] यद्द्विषो दिक्षु दुरितं च पलायते[12] ॥ २६० ॥
जायन्ति[13] यस्य पापानि जायन्ते[14] च शुभोदयाः ॥
यः पृथ्वीं पाति[15] पायन्ति[16] यत्प्रभावाच्च शात्रवः ॥ २६१ ॥
जहात्यसज्जनैः[17] सङ्गं जिहीते[18] दुर्जनैश्च यः ॥
लिनाति[19] धर्म एवासौ नेन्द्रियार्थेषु लीयते[20] ॥ २६२ ॥
चित्तं रञ्जति[21] नारीणां स्वयं तासु न रज्यति[22] ॥
रहत्यविदुषां[23] सङ्गं रहयत्यश्रियं[24] सदा ॥ २६३ ॥
कीर्तिर्भ्राम्यति[25] यस्योर्व्यां गुणाः सर्वे भ्रमन्ति[26] च ॥

---

१ षूद् (अ) [ सूद् ] क्षरणे (१–आ.)। २ " (१०–उ.) । ३ कित् (अ) निवासे (१–प.) व्याधिप्रतीकारेऽर्थे सन्नन्तोऽयम् । ४ केत (०) श्रावणे निमन्त्रणे च (१०–उ.) । ५ जूष् (अ) हिंसायाम् (१–प.) । ६ जुष् (ई) प्रीतिसेवनयोः (६–आ.) । ७ गॄ (०) निगरणे (६–प.) समः प्रतिज्ञाने (२७२५) इत्यात्मनेपदम् । ८ गॄ (०) शब्दे (९–प.)। ९ भुज् (अ) पालनाभ्यवहारयोः (७–आ.)। १० भुज्ञ (ओ) कौटिल्ये (६–प.)। ११ पल् (अ) गतौ (१–प.)। १२ अय् (अ) गतौ (१–आ.) उपसर्गस्ये (२३३६) ति लत्वम् । १३ जै (०) क्षये (१–प.) १४ जन् (ई) [ जा ] प्रादुर्भावे (४–आ.) । १५ पा (०) रक्षणे (२–प.)। १६ पै (०) शोषणे (१–प.)। १७ हा (ओ–क्) त्यागे (३–प.)। १८ हा (ओ–ह्) गतौ (३–आ.)। १९ ली (०) श्लेषणे (९–प.)। २० ली (ङ्) " (४–आ.)। २१ रञ्ज् (अ) रागे (१–उ.) । २२ रञ्ज् (अ) " (४–प.) । २३ रह् (अ) त्यागे (१–प.)। २४ रह (०) " (१०–उ.)। २५ भ्रम् (उ) चलने (१–प.) वा भ्राशेति श्यन् वा । २६ " शपि रूपम् ।

मानं खण्डयते[1] स्त्रीणां खण्डते[2] द्विषतां शिरः ॥ २६४ ॥
प्लोषति[3] द्विषतः सर्वान् प्लुष्यन्नपि[4] च तत्पुरः ॥
अर्थापयति[5] शास्त्राणि नार्थमर्थयते[6]ऽन्यतः ॥ २६५ ॥
विभाजयति[7] यो द्रव्यं सभाजयति[8] सज्जनान् ॥
लुभ्यत्यर्थे[9] न कामे च धर्मे लुभ्यति[10] यः सदा ॥ २६६ ॥
वेदान् गदति[11] यः स्पष्टं न यो गदयति[12] कचित् ॥
अश्नाति[13] शुचि माहात्म्यमश्नुते[14] च परंतपः ॥ २६७ ॥
दक्षते[15] सर्वकार्येषु दक्षते[16] च कुलं द्विषाम् ॥
शिवं यक्षयते[17] भक्त्या विभूत्या यश्च यक्षति[18] ॥ २६८ ॥
गाहते[19] शास्त्रमत्यर्थं गाधते[20] नार्थमन्यतः ॥
यस्मै गुध्नाति[21] तद्दुर्गं तत्क्षणादेव गुध्यति[22] ॥ २६९ ॥
एजते[23] राजचिह्नैर्य एजत्येतद्भयाज्जगत्[24] ॥
इन्धे[25] युद्धेषु यत्तेज एधते[26] यः श्रियाऽधिकम् ॥ २७० ॥

---

१ खड् (इ)[खण्ड्] भेदने (१०–उ.) । २ खड् (इ) मन्थे (१–आ.) । ३ प्लुष् (अ) स्नेहनसेवनपूरणेषु (९–प.) । ४ प्लुष् (अ) दाहे (४–प.) । ५ अर्थ-नामधातुः । ६ अर्थ (०) उपयाच्ञायाम् (१०–उ.) । ७ भाज (०) पृथक्कर्मणि (१०–उ.) । ८ सभाज (०) प्रीतिसेवनयोः (१०–उ.) । ९ लुभ् (अ) विमोहने (६–प.) । १० लुभ् (अ) गार्द्ध्ये (४–प.) । ११ गद् (अ) व्यक्तायां वाचि (१–प.) । १२ गद (०) देवशब्दे (१०–उ.) । १३ अश् (अ) भोजने (९–प.) । १४ अश् (उ) व्याप्तौ संघाते च (५–आ.) । १५ दक्ष् (अ) वृद्धौ शीघ्रार्थे च (१–आ.) । १६ दक्ष् (अ ष्, म्) गतिहिंसनयोः (१–आ.) । १७ यक्ष् (अ) पूजायाम् (१०–उ.) । १८ यक्ष (०) नामधातुरयम् । क्यङभावे रूपम् । १९ गाह् (ऊ) विलोडने (१–आ.) । २० गाध् (ऋ) प्रतिष्ठालिप्सयोर्ग्रन्थे च (१–आ.) । २१ गुध् (अ) रोषे (९–प.) । २२ गुध् (अ) परिवेष्टने (४–प.) । २३ एज् (ऋ) दीप्तौ (१–आ.) । २४ " कम्पने (१–प.) । २५ इन्ध् (ञि इ.) दीप्तौ (७–आ.) । २६ एध् (अ) वृद्धौ (१–आ.) ।

यो रोडति[1] मृषाऽध्मातस्तं रौडति[2] निरीक्ष्य सः ॥
प्रतिषेधति[3] यः शत्रून् कार्यं तस्याशु सिध्यति[4] ॥ २७१ ॥
नयन्ते[5] तद्गुणाः सर्वे यस्तान्नयति[6] दिङ्मुखम् ॥
श्रिया मृडति[7] मृड्णाति[8] सरस्वत्या च सम्पदा ॥ २७२ ॥

( द्रुतविलम्बितम्. )

इति समाप्तमवाप्तगुणोदयं
कविरहस्यमिदं रसिकप्रियम् ॥
सदभिधाननिधानहलायुध-
द्विजवरस्य कृतिः सुकृतात्मनः ॥ २७३ ॥

॥ इति श्रीभट्टहलायुधकृतौ कविरहस्यं संपूर्णम् ॥

---

१ रोड् (ऋ) उन्मादे (१–प.)। २ रौड् (ऋ) अनादरे (१–प.)। ३ षिध् (अ) [सिध्] गत्याम् (१–प.)। उपसर्गस्थनिमित्तेन षत्वम्। ४ षिध् (उ) [सिध्] संराद्धौ (४–प.)। ५ णी (ञ्) [नी] प्रापणे (१–उ.)। ६ „ ७ मृड् (अ) सुखने (६–प.)। ८ मृड् (अ) क्षोदे सुखे च (९–प.)। ष्टुत्वेन णकारः।

( अनुष्टुप्. )

'अज्ञात्वा मतिसामर्थ्यमदृष्ट्वा पिशुनाञ्जनान् ॥
मया कविरहस्येऽयं प्रस्फोटो विस्फुटः कृतः ॥ १ ॥

( वसन्ततिलका. )

आदौ निबन्धगतधातुमथानुबन्धमर्थं ततो गणपदे च विधेर्विशेषम् ॥
एवं हलायुधकृतौ क्रमतो रहस्यप्रस्फोटमेतमकरोत् किल वामनाख्यः ॥ २ ॥

॥ इति कविरहस्यप्रस्फोटः समाप्तः ॥